१०६

६

106

6

अथ

ग्रन्थनामः-	पूर्व "मीमांसाभाष्यम्"	(अष्टमाध्यायः)
कर्तृनामः-	"शबरस्वामी"	
विषयः-	"मीमांसा"	

Purva Mimasa Bhasyam.
8th chap.

8|2

१०६

६

अथ

"मीमांसाभाष्यम्"

१०६/६

106/6

शावरभाष्य अष्टमाध्यायपत्र २५

[illegible] मीमांसा[illegible]अष्टमाध्यायपत्राणि २८

शावरस्वामि प्रणीतम्

२०

श्री॥ ॥श्रीगणेशायनमः॥ अथविशेषलक्षणं॥ ॥ एवंतावत्प्रथमेनाध्यायेनसामान्यतोतिदेशलक्षणमुक्तं॥ अ
विहितधर्म्मकेषु दर्शादिषु कर्मसु विहितधर्म्मकेभ्यो दर्शपूर्णमासादिभ्यो धर्म्मा अतिदिश्यंतइति। तत्रचिंताभवति। किमेक
स्मिन्कर्मणि सर्वेषु कर्म्मसु धर्म्मातिदेशः उताहो नैकस्मादिति। अविशेषात्सर्वेभ्य इति प्राप्तं। एकेन तु निराकांक्षीकृते कर्म्मणि द्वि
तीयधर्म्मप्राप्तौ किंचित्कारणं नास्ति। सत्यं तदेवनुनज्ञायते। कस्मिन्कस्येति तदर्थं विशेषलक्षणं वक्तव्यं अस्मिन्नस्येति तदिद
मध्यायादौ प्रतिज्ञायते अथ विशेषलक्षणमिति। अथेदानीं कृत्स्ना सामान्यातिदेशलक्षणादनंतरं विशेषलक्षणं वक्ष्यामः
तदुपमानं यथा कालं चोद्यमिति। तदेतत्संक्षेपेणोच्यते॥ ॥यस्यलिंगमर्थसंयोगादभिधानवत्॥ यस्य वैदिकस्य वि
धेस्तस्य लिंगं किंचिच्छब्दगतमर्थगतं वा वैकृतांकर्मचोदनायां तद्गुणवाक्यं बाद्यते तत्र स विधेयः स्यात्। कुतः अर्थसंयोगात्।
अ ३ कुतः अर्थसंयोगात्। कुतः अर्थसंयोगात्। तस्यार्थो लिंगस्य तेन विधेयं तद्विशेषेण संयोगात् भवति एवं संयोगिनोन्यतरोदृश्य राम
मानइतरमदृश्यमानमप्यनुमानाद्बुद्धौ सन्निधापयति। अभिधानवत्। यथाग्निहोत्रमित्यभिधानं कौंडपायिनामय १
यमानां नैयमिकाग्निहोत्रधर्मान्बुद्धौ सन्निधापयति। किमतो नैतदतो भवति। अप्रणीयद्वाक्यं तत्पूरणसमर्थेनावय
श्री ३

कथमिति विध्यंतापेक्षः अग्न्याधानादिविधानकांडेनुपाठात् बुद्धौ स्थितेन ... एकवाक्यता
तो दर्शपूर्णमासाभ्यां यजेतेत्युक्तमिति। एवं विध्यंतापेक्षो यो नैमित्तिको विध्यादिः। २
यद्वेन बुद्धौ सन्निहितेन एकवाक्यतां याति यथा दर्शपूर्णमासाभ्यां यजेतेति विध्यादिः सोपि वैदिकेन विध्यंतेनानु
मानात् बुद्धौ सन्निहितेनैकवाक्यतां यास्यति। यथा सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति। अत्र कथमिति विध्यंतापेक्षा
याम् नैकविध्यंतसन्निपाते असाधारणेन निर्वपतिना हविषा दर्शपौर्णमासीकविध्यंतसंयोगिना लिंगेन तदीयो विध्यंतः
प्रसज्यते। तत्राग्नेयादिना पूर्वविध्यंतप्रसंगे एकदेवतात्वेन औषधेन वा साधारणेन लिंगेन। अयं विध्यंतो नियम्य
ते। तदेतदेवं विज्ञायते सौर्यं चरुं निर्वपेदाग्नेयवदस्मात् वैल्वमेकादशकपालं निर्वपेत् अग्नीषोमीयवत्स एवं प्रतिप
दारव्याने तद्गौरवं परिहरन्निरर्थकारैः सामान्याः शब्दाः परिगृहीताः प्रकृतिवदिति वैद्यमस्त्यमपि किंचित्सामान्यं च
दोषाश्रयो वा हविर्देवतादितद्गुणवान् पादयुपलभ्यते तत्तदीयो विध्यंतः कल्प्यः तरेतत्संक्षेपेण चैव सर्वसूत्रे निर्दि
श्यहितोर्थस्तु नैरः प्रपंचः श्लोकमप्युदाहरति। विस्तीर्य हि महज्जालमृषिः संक्षिप्य चाब्रवीत्। इष्टं हि विदुषां लोके समास
व्यासधारणमिति॥ ॥ प्रकृतित्वादिष्टेः सोमे प्रवृत्तिः स्यात्॥ ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रूयते तत्र विध्यंतप्रतिबंधिता
कुतो अस्मिन् विध्यंतः स्यादिति तदुच्यते। प्रकृतित्वादिष्टेः सोमे प्रवृत्तिः स्यात्। दर्शपौर्णमासिको विध्यंतः सोमे स्यात्। कुतः प्रव

त्रित्वादीक्षणीयादिष्विष्टिषु दर्शपौर्णमासिको विध्यंतः प्रवृत्तो दीक्षणीयायाप्रमतिथ्यायांप्रायणीयायां प्रवृत्तो वतर
नंतरं सोमस्तत्रापि स एव प्रवृत्त्या विज्ञायते यथा देवदत्तो भोजयितव्यः विष्णुमित्रो भोजयितव्यो माठरः कौण्डिन्यो भारद्वा
जस्तस्मुत्तरेष्वपि भोजयितव्य इति प्रवृत्तान्तुवर्त्तते तस्मादैष्टिकः सोमे विध्यंतः ॥ लिंगदर्शनाच्च ॥ तस्यैव कथांतप्रयाजानुयाजा॥
इति वैष्टिका धर्माः सोमे दृश्यंते। तस्माच्चास्मिन्नैष्टिको विध्यंतः ॥ कृत्स्नविधानाद्वापूर्वत्वं। अपूर्व एव हि सोमः न कुतश्चिद्धर्मा
न गृह्णाति कुतः कृत्स्नविधानादितिकर्त्तव्यतायाः अपि विधीयंते। पूर्ववलमुक्तं। विहितेतिकर्त्तव्यतश्चापां तस्मादपूर्वः ॥ स्रु
गभिघारणाभावस्य च नित्यानुवादात् ॥ स्रुगभिघारणस्य चाभावोऽनुवादः सोमे भवति। एतंवै देवा वृंक्त्वा सोमम
घ्नस्कंवौ वाहत स्मात्स्रुविसोमहविर्नीसाघतेनाभिघारयंतीति तदुपपद्यते यद्यपूर्वः सोमो यदि दर्शपूर्णमास प्रकृतिः
स्यात् आज्येनाभिघार्येत तस्मान्नाहूयेत। न चैतद्दर्शनेनोपपद्यते। तस्मादपूर्वः ॥ ॥ विधिरिति चेत् ॥ इति चेत् पश्यसि स्रुगभिघार
णाभावानुवाददर्शनादपूर्वः सोम इति। अथ कस्माद् दर्शपूर्णमासप्रकृतित्वे न सामान्यस्य स्रुगभिघारणस्य प्रतिषेधकोयं
विधिर्न भवतीति क्लिष्टतायां प्रतिज्ञायां सूत्रेण परिवादयति ॥ ॥ न वाक्यशेषत्वात् ॥ नायं विधिः कस्माद्वाक्यशेषत्वात् । अ

नसो ममा ऽयेमे ४

राम २

कूरमकु
हेनु

न्योऽत्रविधिराम्नातः यदाहांशुरंशुस्ते देवसोमाप्यायतामिति तस्य वाक्यशेषे यं कर्थं ज्ञायते। तेनाकं दितत्वादवधि
पुर्वीएतत्सोमं यदभिषुण्वंति यदस्य स्कंदेवो वाह्यं कुर्वंति यद्वाऽसमंतिक्रमकार्षुः यदाहांशुरंशुर्दे देव सोमाप्यायतामिति। यदे
वास्यादाउः स्तोरमह्युरस्तदाप्याययंतिइति। ध्येयमपि विधिः स्याद्वाक्यं भिद्येत तस्मान्नैव विधिः। अंकोवानुयाषणात्सो
मेक्रीकते यदनुपोष्य प्रायायायाक्षीववद्धमेनं ग्रनुष्पिंल्लोकेननीयरन्निति। दार्शपौर्णमासिके विध्यंतेसत्तिनियंतनुपोष
णंस्यान्नातरनुपोषणं ज्ञाकान युज्यते। तस्माद पूर्वं; दर्शनमेष्टिकानांस्यात्। यत्र प्रयाजानुयाजानां दर्शने लिंगत्वेनो
पदिष्टं तस्यैकधातप्रयाजानुयाजा इति तद्दीक्षणीयादीनां सोमांगभूतानां कर्म्मणं ये प्रयाजानुयाजास्तेषां समुच्चयवर्नो
किंकारणं सोमस्यापूर्वत्वात्। तेषां वतापतांत च भावात्। अंगानामपित्वतस्यैतिशाक्यतेवक्तुं। यथावाजपेयस्य यूप इति तस्मा
दपूर्वः सोमः॥ ॥ इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात्॥ इष्टय उदाहरणं मैंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इ
त्येवमाद्याः; तत्र संदेहः; किं दार्शपौर्णमासिकाः कासोमिकोवा विध्यंतः। उतदार्शपौर्णमासिकएवेति। किं प्राप्तं। अनियमः। द
र्शपूर्णमासयोरपिविध्यंतोस्ति सोमेपि। इमाङ्ख्येय योविध्यंतपेक्षा एकेनवविध्यंतेन भवितव्यमिस्युक्ते नवगंसोऽन्यतरनि

यमविशेषः तस्मादनियम एवं प्राप्त उच्यते। इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिर्हेतुर्नैकप्रज्ञात इति। कः पुनरसौ। चोदना
याः प्रवृत्तिलिंगसंयोगः। किं पुनस्तत्र प्रवृत्तिलिंगं। ताद्धितेन देवतोपदेशः। कपालवत्तां निर्वपतिशब्दश्च। ऐन्द्राग्नमेकादशकपा
लं निर्वपेदिति। इतरत्रापि तथैवैन्द्राग्नो द्वादशकपाल इति निर्वपति रथ्यग्निहोत्र हवण्या हवींषि निर्वपतीति प्रकृतिलिंगे
न विध्यंत विशेष उक्तो यस्य लिंगमर्थसंयोगादिति। तस्माद्दर्शपौर्णमासिकस्तासु विध्यंतः। तत्र दर्शपतिप्रयाजं प्रयाजेष्व
सूत्र ५ लंकृत्य हातीति। अलिंगा[illegible]पिष्टालीपुलाकवत्सिद्धिः।।।। पशौ वा लिंगमर्थदर्शनात्।। पशौ अग्नीषोमीये चिंत्यते। किं दार्श
पौर्णमासिको विध्यंत उत सोमिक इति। किं प्राप्तं तथैव पूर्वपक्षः। तत्रोत्तरमभिधीयते। पशौ वा लिंगदर्शनात् पशावेव दार्शपूर्ण
मासिक एव विध्यंतः। कुतः। लिंगदर्शनात्। एकादश प्रयाजान्यजति एकादशानुयाजानिति। तथा[illegible]च माघार्य[illegible]पशुमन
प्रा॰ मि॰ क्तीति। न नु लिंगमुपदिष्टं कुतः। चोदनासामान्यात्। किं सामान्यं व्यक्तचोदनात्वं। का व्यक्तिः। द्रव्यदेवतावत्त्वं अग्नीषोमीयं पशुमा राम
लभेतेति। तस्मै दं पय इत्यव्यक्तचोदनः खलु सोमः।। [illegible]।। इति पशुवंध्या उदाहरणं सवनीयो निरूढः पशुः सोमार्थ पशुः ३
तेषु किं दार्शपौर्णमासिको विध्यंत उत दैक्षस्येति दैक्षस्य [illegible] उच्यते दीक्षासंबंधात्। किं प्राप्तं पशोर्नेत्न्यायेन दार्शपौ

र्णमासिक इति। तथा प्राप्त उच्यते ऐंद्राग्नस्य चेतरेषु पशुषु सवनीयादिषु अग्नीषोमीयस्य विध्यंत आलभंति चोदनासामा
न्यात्पशुत्वचोदनासामान्यात्तत्रैव दर्शयति। वपयाप्रातःसवने चरंति पुरोडाशेन मध्यंदिनेंगैस्तृतीयसवन इति पशुपुरो व२
डाशांगमवादं दर्शयति। मैत्रेन च। तथाश्च विदेदुंबरो यूपो भवतीति यूपं दर्शयति। तस्मादग्नीषोमीयः पशूनां प्रकृतिः॥ एकाद
शिनेषु सौत्यस्यैकादशिनस्य दर्शनात्॥ एकादशिनाः पशवः उदाहरणं॥ कृष्णशीर्ष आग्नेय इत्यारभ्याम्नाताः। अग्नेः पशोर्व
आग्नेयेन वापयति। मिथुनं सारस्वत्या करोति प्रजनयति सौम्येनेति। तेषु संदेहः। किमग्नीषोमीयविध्यंत उत सवनीयविध्यं
तरिति। किं प्राप्तं। पूर्वोक्तेन न्यायेनाग्नीषोमीयस्येति प्राप्त उच्यते। एकादशिनेषु सौत्यस्य सौत्य इति तुल्यकालत्वात् सवनीयमेकं
तदीयो विध्यंत एकादशिनेषु कैतोद्देरशनान्यस्य दर्शनात्। अग्निष्टोवैवरशनेत्यादाय यद्यप्येकादशिन्यां रशनानां समेकैकं यूपं परिव्य
श्री यतीति। अग्नीषोमीयप्रकृतित्वे एकैकरशनान्यं स्यात्। अथ वचनमिदं कस्मान्न भवति। अग्निष्ठामेव रशनेत्यादाय तेन तद्व
विधीयते। यदि रशनाद्वित्वमपि विधीयेत तदा वाक्यं भिद्यते। तस्मात्तदनूद्यते। ननु लिंगमपदिष्टं कुतः प्राप्तिः। उच्यते समाने पशुत्वे
सुत्याकालतावैशेषिकेन लिंगेन ततः प्राप्तिः॥ तत्रावृत्तिर्गणेषु स्यादावृत्तिः पशुयूपदर्शनात्॥ इह पशुगणा उदाहरणं। वसंताय ल

मांस्त्रीन्पशूनालभेत। तथा मैत्रं श्वेतमालभेत वारुणं कृष्णं अपां चौषधीनां च संधावन्नकाम इति। तत्र विचार्यते किमग्नी
षोमीयस्य विध्यंत उतैकादशिनानामिति यथालिङ्गेन न्यायेनाग्नीषोमीयस्य। एवं प्राप्त उच्यते। तस्य प्रकृतिर्गणेषु स्यात्। तेषामे
कादशिनानां प्रकृतिः पशुगणेषु स्यात्। कुतः प्रतिपशु यूपदर्शनात्। यत्र त्रिषु यूपेष्वालभेत वर्हिर्यस्मा इंद्रियं वीर्यं स्या
त्कृत्यमस्य जनयेदेकयूप आलभेत तानि यूपत्वितं प्रतिषिद्ध्य एकं यूपं सत्त्वामपण्यं विरुध्यादिति तदुपपद्यते यद्येकादशिनी न विध्यंतस्य
त्वाहि प्रतिपशु यूपः। अग्नीषोमीयप्रकृतित्वे एक एव यूपः स्यात्। तत्रैतन्नोपपद्यते। तस्मादेकादशिनीनां विध्यंतः पशुगणेषु
अव्यक्तासु तु सोमस्य॥ इदं श्रूयते। अभिजिताय जेतेत्येवं वर्णा तीयाय जतयस्ते पुंविश्वं वर्तते धिंता। किमेषु सोमिको विध्यंत उत
दार्शपौर्णमासिक इति। अविशेषादनियमे प्राप्त उच्यते अव्यक्तासु तु सोमस्य कार्य अव्यक्तता। द्रव्यदेवतस्याभावः द्रव्यदेवतेन
हि यागोभिव्यज्यते। एतासु द्रव्यदेवताचोदना। अभिजिताय जेतेति एतास्वव्यक्तासु सोमिको विध्यंतः स्यात्। कुतः। अव्यक्तसा
मान्यात्। सोमेप्यव्यक्ता चोदना। ज्योतिष्टोमेन यजेतेति। ननु सोमेन यजेतेत्यस्याव्यक्ता चोदना तथापि देवताया अभावाद्व्यक्त राम
तस्माद्बृहणोत्तानयजेतेत्यव्यक्तचोदिते दीक्षणीदीनि सोमांगानि दर्शयति। दीक्षणीयायां द्वादशमानं हिरण्यं दक्षिणा वत् ४

विंशतिमानेभ्यापलीयायामिति। तस्मात्तास्तु सौमिको विध्यंतः॥ गणेषु द्वादशाहस्य। इहाहर्गणा उदाहरणं द्विरात्रा
दयः शतरात्रपर्यंताः। तेषु संदेहः। किं ज्योतिष्टोमिको विध्यंतः उत द्वादशाहिक इति। एवमन्यायेन सोमिके प्राप्ते उच्यते। गणे
षु द्वादशाहिको विध्यंत इति। कुतः। चोदनासामान्यात्। द्वादशाहेन यजेत द्विरात्रेण यजेतेत्यहः शब्दोप्यहोरात्रवचनः।
रात्रिशब्दोप्येतदुभयगतं लिंगमर्थगतमपि गणत्वं गणएव संघातधर्मे गणा मनुष्यहीतुं समर्थो नैकाहः। द्वाभ्यां लोमावद्य
तिद्वाभ्यां समिति एतदारभ्य द्वादशोपसत्त्वं द्वादशाहिकं धर्मं गवामयने दर्शयति। तस्मादहर्गणेनो द्वादशाहः प्रकृति।
॥ ॥ गव्यस्यैव तदादिषु। इह संवत्सरसत्राण्युदाहरणं। आदित्यानामयनप्रभृतीनि तेषु चिंता। किं द्वादशाहिको विध्यंत उ
त गवामयनिक इति। पूर्वेणैव न्यायेन द्वादशाहिके प्राप्तेभिधीयते गव्यस्यैव तदादिषु। गव्य इति गवामयनं ब्रूमो गोसंबं
धात्। गावो वा एतत्सत्रमासत इति तस्य विध्यंतस्तदादिषु संवत्सरसत्रेषु स्यात्। कुतः। संवत्सरसामान्यात्। प्रत्यय उप
गायंतीति वमाहव्रतिकं धर्मं संवत्सरसत्रे दर्शयति। ऋत्विज उपगायंतीति वसहस्रसंवत्सरे। निकायिनां च पूर्वस्योत्त
रेषु प्रवृत्तिः स्यात्। निकाय इति संघात उच्यते। तेन तारा वर्षेण व्यवस्थित उच्यते। संघाते निकायिनः। यथा सारस्वताः साद्यस्क्राः सप

पूर्वस्यचेविद्धर्म्माः आम्नाताः उत्तरेत्वधर्म्मकास्तत्र विंत्यते। किंज्योतिष्टोमस्य विध्यंत उत प्रथमस्य निकायिन इति। ज्यो
व्यक्तचोदनात् ज्योतिष्टोमस्येति प्राप्त उच्यते। निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात्। कुतः। निकायित्वसामान्यात्सादृश्याएण।
सादृश्यसामान्यात्। साधर्म्याएण। साधर्म्यं धर्म्मसामान्यात्। एवं सर्वत्र पूर्वस्मिंश्च वसादृश्ये सहस्रं दक्षिणा मान्नाय उत्तरस्मि
न्दर्शयति। यावदस्य सादृश्यस्योत्तरागोः समाहिता भवन्ति। तद्दस्मान्निकायस्य सौत्रायइति। तथा पूर्वस्मिन्नु साधर्म्ये सोम उत्तरस्मि
वत्सतरः सोमक्रयणः स्पर्द्धमानानामभिसाम्नायोत्तरस्मिन्नपि तमेव दर्शयति त्वीगोः। सोमक्रयणी आह नाद्यपास्पर्द्धते इति तस्मा
त्पूर्वस्योत्तरेषु धर्म्माः॥ कर्म्मणः त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयत्वात् संबंधनत्वात्। इह फलनियमकर्तृसमुदा
या उदाहरणं फलं स्वर्गो नियमो यावज्जीविकोभ्यासः कर्त्ता स्वर्गकामः समुदायो दर्शपूर्णमासौ इति। तत्र विंत्यते। किं फलनियम
कर्तृसमुदायानां सौर्यादिषु प्रवृत्तिर्नेति किं प्राप्तं॥ इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिरित्यनेन न्यायेन प्रवृत्तिरिति प्राप्तं। तथा
प्राप्त उच्यते फलनियमकर्तृसमुदायस्याप्रवृत्तिः। कुतः। कर्म्मणो प्रवृत्तित्वात् तत्संबंधनत्वात् च फलादीनां कर्म्मता वच्च प्र राम
वर्त्तंते। किं कारणं विध्यंते न धर्म्माः प्रवर्त्तंते। न च कर्म्मविध्यंतविहिते विध्यादिविहितं तत्। तस्माच्च प्रवर्त्तंते। तस्याप्रवृत्तिर्वा ५

तत्फलनियमकर्तृसमुदायस्यानन्वयोऽप्रवृत्तिरित्यर्थः॥ कुतः तदबंधनात्॥ फलं तावद्दर्शपूर्णमासाभ्यां यजेतेति
दर्शपूर्णमाससंयुक्तं श्रुतं तथा च दर्शपूर्णमासौ तत्र भवितुमर्हतः। न च सौर्यादिषु तौ स्तः। अतः स्वर्गस्यापि तत्राभावः।
एवं नियमोऽपि कर्म्मबंधनः यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति दर्शपूर्णमासा[illegible] भावे कथं स्यात्। तथा कर्तृकर्म्मबंधे
नो दर्शपूर्णमासाभ्यां स्वर्गकाम इति। सोऽपि कथं तयोरसतोः स्यात्। समुदायोऽप्याग्नेयादीनां तानि सौर्यादिषु न संतीति तत्समु
दायः कथं तत्र भवेत्। तस्मात्तेषामप्रवृत्तिः प्रकृतौ वापि तासां स्यात्॥ अपि वा धर्म्माणां प्रवृत्तिः कर्म्मार्थं कर्म्मण उपकर्तुं। न वा
फलादीनि कर्म्मण उपकुर्वंति। फलं तावत्पुरुषस्योपकरोति न कर्म्मणः उक्तं हि फलं च पुरुषार्थत्वादिति॥ नियमोऽपि न कर्म्मधर्म्मः।
कर्तृधर्म्मोऽसावित्युक्तं। कर्तुर्वा श्रुतिसंयोगादिति तथा कर्ता स्वर्गकामो न कर्म्मार्थः कर्म्म स्वर्गकामार्थं। न हि स्वर्गकामः कर्म्मणेऽर्थे
जेतेति। एवमेतेषां कर्म्मणोऽनुपकार उपदिश्यते। स्वर्गकामो यजेतेति। किं तर्हि कर्म्म स्वर्गकामस्योपदिश्यते स्वर्गकामो यजे
तेनाप्नुयादिति। तथा समुदायो न कर्म्मार्थः फलार्थी सोऽदर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। एवमेतेषां कर्म्मणोऽ
नुपकारकत्वात्प्रवृत्तिरनर्थिका स्यात्। तस्मादप्रवर्त्तनम्॥ अश्रुतित्वाच्च॥ अत्राह यदि दर्शपूर्णमाससंयोगात्फलादीना

मप्रवृत्तिः प्रयाजादीनामपि तत्संबंधादप्रवृत्तिं प्राप्तास्तान्यपि हि तत्संयुक्तानीति उच्यते। यद्यपि तानि दर्शपूर्णमासयोः
श्रुतानि विधीयंते न तु सौर्यादिष्वतिदिश्यंते तिष्ठानि फलादीनि तु न विधीयंते नातिदिश्यंते। तेषां यदि प्रत्यक्षा प्रवर्तिका श्रुतिः स्या
त्तत्र प्रवर्तेरंस्तान्न वा सावस्ति। तस्माच्छ्रुतित्वान्न प्रवर्तन्ते। ॥ गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात्॥ इह गुणकामा उदाह
रणं। गोदोहनेन प्रणयेत्पशुकामस्य। उपास्मै गायता नर इति ग्रामकामाय प्रतिपदं कुर्यादित्येवमादयस्तत्र विचार्यते। किं
गुणकामानां वैकृतेषु प्रवृत्तिरुत नेति। ततः सूत्रेणैवोपक्रमः। गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात्। प्रवृत्तिर्गुणकामानां। कु
त आश्रितत्वात्। गोदोहनं प्रणयनाश्रितं गोदोहनेन प्रणयेदिति। तत्र प्रणयनं प्रवर्तते। आश्रयेव प्रवर्तमानेन तदाश्रितम
पि प्रवर्तते। यथा पटस्याकृष्यमाणे तदाश्रितं चित्रमप्याकृष्यते। यथा वा चमसः प्रवर्तते यथा वा खादिरे वीर्यकामाय यूपं कु
र्यादित्येवं गोदोहनमपि प्रवर्तते। गोदोहनेन प्रवर्तमानेन तदाश्रितः कामोपि प्रवर्तितुमर्हति। तस्माद्गुणकामानां प्रवृ राम
त्तिः॥ ॥ निवृत्तिर्वा कर्मभेदात्॥ निवृत्तिर्वा गुणकामानामप्रवृत्तिः कुतः कर्मभेदात् कार्यभेदादित्यर्थः। अन्यत्कार्यं गो ६
दोहनस्यान्यच्चमसस्य चमसः क्रत्वर्थो गोदोहनं तु पुरुषार्थं। तदुक्तं। यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणा वि

मकृत्वादित्यत्राह क्रत्वर्थः किमर्थं प्रवर्त्तेत । क्रतूपकारायेति तस्य प्रवृत्तिः एवं प्रतिपदः तस्मान्न प्रवर्त्तेरन् गुणकामाः
यत्नूपपन्नं । यथा खादिरं वीर्यकामाय यूपं कुर्यादित्यत्र प्रवृत्तिरेवमत्रापीति तत्र ब्रूमः ॥ ॥ अपि वा तद्विकारत्वात् क्रत्व
र्थत्वात् प्रवृत्तिः स्यात् ॥ अपि वा एवं विधेषु प्रवृत्तिः स्यात् । कुतः अतद्विकारत्वात् । न खादिरः क्रत्वर्थविकारो अयमपि क्रत्व
र्थ एव । तदुक्तमेकस्य तूभयत्वे संयोगपृथक्त्वमिति । क्रत्वर्थश्चायं यावत्प्रवर्त्तेत तस्मिंश्च प्रवर्त्तमाने तदाश्रितः कामो
पि प्रवर्त्तेत । खादिरेण हि संसेत्स्यति । सवरखादिरेऽपि तस्मात्कामं साधयिष्यति ॥ ॥ एककर्मणि विकल्पोऽविभागो हि
चोदनैकत्वात् ॥ सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति श्रूयते । अस्ति तु उभयतावृभिप्रयोन द्वयं चतुर्होत्रा पौर्णमासीमभि
मृश्यात्पंचहोत्रामावास्यामिति । तदिदं द्वयं चोदकेन प्राप्यते । तत्र संशयः किं सौर्ये यदा पौर्णमास्यां प्रसुज्ञातेन तदा चतुर्होत्रा
भिमृष्टव्यो यदामावास्यायां तदा पंचहोत्रा उतोभयत्र विकल्पः । चतुर्होत्रा वा पंचहोत्रा वेति । किं प्राप्तं व्यवस्थेति । किं प्राप्तं
व्यवस्थेति । कुतः चोदकानुग्रहात् । प्रकृतौ व्यवस्था कृता इहापि चोदको व्यवस्थां प्रापयति । एवं प्राप्ते उच्यते । एकस्मिन्कर्मण्य
त्र सौर्ये विकल्पः । कुतः । अविभागो हि चोदनैकत्वात् ॥ एकैषा चोदना सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । तत्राधिमा

गोनवस्तुभावस्याभिमर्शनेप्राप्यते। तयोरेकार्थत्वात् समुच्चयोन संभवतीति तस्माद्विकल्पः यन्तुप्रकृतौ व्यवस्थेति। नासौका
लकृता किं तर्हि समुदायकृता नव सौर्ये तौ समुदायौ स्तः यद्येवमभिमर्शनमेव तर्हि न प्राप्नोति तयोः समुदाययोरभावा
दिति। अत्रोच्यते न प्राप्नोति यत्समुदाययोरभिमर्शनमुच्यते ततयोस्त्वनभिप्रेतत्वात्समुदायिनां तदुच्यते लक्षणया स
मुदायि विकारश्च सौर्यः तस्मात्तत्रापि वादको प्रापयतीति तत्र॥ ॥लिंगसाधारण्याद्विकल्पः स्यात्॥ सौर्ये कर्मणि दार्शपौ
र्णमासिको विधांतः स्तुतः। इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिरिति। संति तु तत्र कर्माण्याग्नेयादीनि तत्र विचारः॥ किं यस्य क
स्य विद्वा दर्शपौर्णमासिकस्य कर्मणः सौर्ये विधांत उताग्नेयस्येति। किं प्राप्तं किं प्राप्तः विकल्पः कुतः॥ लिंगसाधारण्यात्। सौर्ये द
र्शपौर्णमासिके विध्यंतप्राप्तौ यल्लिंगमुपदिष्टं प्रयाजे प्रयाजे कृष्णलं जुहोतीति तत्साधारणं सर्वेषां विधांतः संभवति। नवस्
तुब्बलत्तस्माद्विकल्पः। एकार्थत्वान्नियम्येत पूर्ववत्त्वाद्विकारो हि। आग्नेयस्य विधांतो नियम्येत कुतः एकार्थ्यात्। एकदेवत
त्वादित्यर्थः॥ आग्नेय एकदेवत्यः सौर्योपि तेनैकदेवतत्वेन लिंगेनाग्नेय विधांते नियम्येता पूर्ववत्त्वात्। पूर्ववान् पं सौर्यः पूर्वत्रा
भिहिते विधांतमपेक्षते विकारो हि विद्वविशेषः॥ सर्वाश्च विकृतयः पूर्ववत्यः चोदनावाक्यानामसमाप्तत्वात्। सौ लिंगेन विधे

तन्नियमो भवतीत्युक्तं। अस्ति त्वेकदेवतत्वे लिंगं तेनाग्नेयं विद्धंतः॥ ॥ अश्रुतित्वान्नेति चेत्॥ अत्राह स्यादेतदेवं य-
द्यत्रैकत्वं श्रूयेत न तु श्रूयते। कथं। तद्धितेनायं निर्देशः। सौर्यमिति। तथाग्नेयमिति तत्र वचनव्यक्तिर्न ज्ञायते किं सूर्यो देवता
स्य उत सूर्यौ उत सूर्या इति। तथाग्नेयेऽपि॥ ॥ स्याल्लिंगभावात्॥ स्यात्तु वस्थितिरेकत्वस्य। कुतः। लिंगभावात्। लिंगमत्रास्ति। किं वाक्य-
शेष एकत्वं श्रूयते। सौर्यं तावद् अमुमेवादित्यं स्वेन भागधेयेनोपधावति स एनं ब्रह्मवर्चसं गमयतीति। आग्नेये चांगिरसो वा इ-
त उत्तमाः स्वर्गमायंस्ते यज्ञवास्त्वभ्यायंस्ते पुरोडाशं कूर्म्मं भूतं सर्पन्तमपश्यंस्तमब्रुवन्निंद्राय ध्रियस्व बृहस्पतये ध्रिय-
स्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स तानाह न ध्रिये तमब्रुवन्नग्नये ध्रियस्वेति सोऽब्रवीत् ध्रियेऽहं यदाग्नेयोऽष्टाकपालो मावास्यायां पू-
र्णमास्यां चाच्युतो भवत्यग्निमेव स्वेन भागधेयेन समर्द्धयतीति। तथा चान्यार्थदर्शनं। अनुवाक्यायामेकत्वश्रवणं। अग्निर्मू-
र्द्धा दिवः ककुदित्याग्नेये। उदु त्यं जातवेदसमिति सौर्ये। ननु पुनरुक्तमेतल्लिंगद्वयोपदर्शनमिति। तदुच्यते। नैतत्पुनरुक्तं। एकमत्र व-
चनागतमेकं मन्त्रगतं चोदनागतं प्रापकं मन्त्रगतं प्राप्तस्य द्योतकमिति। विप्रतिपत्तौ हविषा नियम्येत कर्म्मणस्तदुपाख्यत्वा-
त्॥ इदं श्रूयते। ऐंद्रमेकादशकपालं निर्वपेदिति। आग्नेयं पय इति। तत्र संदेहः। किं देवतासामान्यादैंद्रपुरोडाशे सांनाय

स्यवियंतः॥ आग्नेये च पयस्योषधस्य देवतासामान्यं च लव्धतरं अथ हविः सामान्यादुत्तरत्र सांनाय्यस्यैकदेशे
पयस्य हविः सामान्यं वलीय इति किं प्राप्तं। उच्यते देवतासामान्यं वलीय इति। कुतः मुख्यत्वात्॥ मुख्यमियंन्त्रिता देवताऐं
द्रमाग्नेयमिति। यद्यन्यनियंत्रितं हविः तस्य विरोधे मुख्यानुग्रहो न्याय्यो मुख्यस्याविरुद्धप्रवृत्तित्वात्। जघन्यस्य तु मुख्येन
विरुद्धा प्रवृत्तिः तस्माद्देवतासामान्यं वलीय इति प्राप्ते ब्रूमः। विप्रतिपत्तौ हविषा नियम्येत। विप्रतिपत्नावेतस्यां हविर्देवतयो
र्विषा विधानतो नियम्येत कुतः कर्म्मणस्तदुपाख्यत्वात्। कर्म्म देवतां प्रति द्रव्यस्योत्सर्गः स च हविषोपाख्यायते। उपलभ्यत
इत्यर्थः॥ हविस्स्पृश्यमानं दृश्यते। किमतः अतो हविः कर्म्मणः प्रत्यासन्नं प्रत्यासत्तिश्च लिंगान्न तु देवतापि यागेन संबंधा
त्तया विना यागो भवति। उच्यते। सत्यं संवद्धा। आरादुपकारिणी तु सा नासौ तत्प्रत्यक्षेण तस्माद्दूरितरां। अतो हविः सामान्यं वली
यः तेन च कर्म्म संयोगात्। तेन च हविषा संयुज्य कर्म्म चोद्यते। ऐंद्रमाग्नेयमिति हविः प्रधानः शब्दः किमतः अतो हविस्त्र राम
बुद्धौ संनिहितं तल्लिंगं भवति। यथा धूमो ऽग्निविषयतामापन्नो लिंगं। न विद्यमानः न तु देवताप्यत्र श्रूयते ऐंद्रमाग्नेय ८
मिति। उच्यते॥ ॥गुणत्वेन देवताश्रुतिः विशेषणत्वेन देवता श्रूयते। हविर्विशेष्यत्वेन विशेष्यं च बुद्धौ संनिहित

द्वि२

भवति। ननु विशेषणं तद्विशेष्यं विशेष्यान्निवर्त्तते। कथं ज्ञायते। विशेष्यानुबंधसंयोगात्॥ यथा राजपुरुषः पृष्ट
स्तुक्तः पुरुषः पृष्टो गम्यते न राजा। एवमिहापींद्रं पयइत्युक्ते हविर्गुणः संन्निधीयते न देवता। यत्र तु गुणः संन्निहितस्तत्र लिंग
मित्युक्तं। तस्माद्धविः सामान्यं बलीयः॥ अत ऐंद्रः पुरोडाशो आग्नेयस्य विधंततः॥ आग्नेयेव पयस्विसान्याय्यस्येति॥
गुणत्वं न देवतायाः श्रुतेः। इत्येतस्य सूत्रस्यापरा व्याख्या। इदं पदोत्तरं सूत्रं। यदुक्तं हविः सामान्यं बलीय इति। नैतद्युक्तं। दे
वतासामान्यं बलीय इति। कुतः। सर्वेयं यागो देवताराधनार्थ एव सास्य प्रसन्ना फलं ददाति। एवं श्रूयते। तृप्त ए
वैनमिंद्रः प्रजया पशुभिस्तर्पयतीति। यश्चेंद्रस्य प्रसादनो याग इति ज्ञातः पुनरपींद्रप्रसादयितव्य स एव ग्राह्यो भवति
तस्माद्देवतासामान्यं बलीयः। इत्यत्र ब्रूमः। स्यादेतदेवं यदि देवतातः फलं स्यात्। यागात्तु फलं श्रूयं कामोयजेतेति श्रू
यते। यत्तूक्तं तृप्त एवैनमिंद्र इति तत्रोच्यते। गुणत्वं देवतायाः श्रुतेः। यागे गुणभूता तस्या दानत्वं स्तुत्योच्यते यथा अमात्येन
मे ग्रामो दत्तः सेनापतिना मे ग्रामो दत्त इति। वामात्यः सेनापतिर्वा ग्रामस्य प्रभवति। राजैव प्रभवति। इतरस्मिन्नगुणएस्तु
तेस्तुत्यावादत्ववादः तस्माद्यथोक्तेनैव न्यायेन हविः सामान्यमेव बलीय इति॥ हिरण्यमात्रेय धर्म्मितेज्ञस्यात् प्राजापत्येषु

ते चरुं निर्वपेत् शतकृष्णलमायुःकाम इति श्रूयते। तद्धिरण्यमाज्यधर्म्म स्यात्। उपांशुयाजविध्यंतस्तत्र भवेत्। कुतः
तेजस्त्वसामान्यात्। तेजस्त्वसामान्यं हिरण्यमश्मनां तेज आज्यमपि गवां सार इत्यर्थः॥ अथवा हिरण्यमपि तेजस्वित्वादुज्ज्व-
लमाज्यमपि स्निग्धत्वादुज्ज्वलमेवातस्मात्सामान्यादुपांशुयाजधर्म्मा शतकृष्णलश्चरुः॥ ॥धर्म्मानुग्रहाच्च॥ हिरण्ये ववह-
वत्त्वाज्यधर्म्मा अनुगृह्यंते। अवदानादय औषधधर्म्मास्तु हीयेरन्नवहननादयः तस्मादप्याज्यधर्म्म॥ ॥औषधं वा विशदत्वा-
त्॥ अथवा औषधधर्म्मा हिरण्ये विधीयंते। कुतः विशदत्वात्। हिरण्यमपि विशदं औषधमपि विशदं। कः पुनरेतयोः सामान्ये
विशेषः न खलु कश्चित् किंतु विशदत्वस्य कारणं घृतमपि द्रवकं तेनास्ति तयोस्तत्कर्म्मानुग्रह एव॥ ॥चरुशब्दाच्च॥ चरुशब्द-
श्चात्र भवति। प्राजापत्यं चरुमिति। चरुशब्दश्च औषधस्य वाचकः। तद्बलवदौषधस्य लिंगं॥ ॥तस्मिंश्च श्रपणश्रुतेः॥ तस्मिंश्चा-
ज्ये श्रपणं श्रूयते। घृते श्रपयतीति किम्मतः अत एव तद्भवति औषधधर्म्मविधीयंते न श्रपणं प्राप्यते। तत्र केचिदाज्यं विधापयिष्यते। राम
आज्ये विधीयंते नु श्रपणं आज्यं च विधीयमानं तथा वाक्यं सिध्येत। तस्मिंश्च श्रपणश्रुतेरित्येतस्यापराव्याख्या। अत्राह। ना- ६
ज्ञादेव हाजं श्रूयते। तस्मात्तस्य विधीयंत इति। तत उत्तरमिदं तस्मिंश्च श्रपणश्रुतेः दर्शपौर्णमासिकं श्रपणं तस्मिंश्चाज्ये

ल३

श्रूयते। गुणगतं तत्सामान्यं हविर्गतं तु वैशद्यं वरुणशब्दश्च तस्मात्सैव बलवती॥ ॥ मधूदके द्रवसामान्यात्पयोविकारः
स्यात्॥ विश्वजितामिष्टोऽश्रूयते दधि मधु घृतं धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यं भवतीति। तत्र मधूदके पयसो विकारः स्या
त्। कुतः। द्रवसामान्यात्। द्रवे मधूदके पयोऽपि द्रवं। आज्यं वा वर्णसामान्यात्॥ आज्यं वा इमे विकुर्यातामुपांशुयाज्यस्य तयो
र्धर्म्यंतः स्यात्। कुतः। वर्णसामान्यात्। समानवर्णं मधूदके आज्येन॥ धर्मानुग्रहाच्च॥ आज्यधर्माविह होमे मधूदकयोः प्रा
प्ताः कर्तुस्तु सवनादयः न तु पयोधर्म्मा दोहनादयः॥ पूर्वस्य वा विशिष्टत्वात्॥ पक्षः पूर्वं कारणमुक्तं द्रवत्वसामान्यं तद्विशि
ष्टं॥ आज्यमप्यग्निसंयोगाद्द्रवीभवति तस्मादुपांशुयाजविध्यंतो मधूदकयोरिति॥ ॥ इति श्रीमद्दश्रीकुवरस्वामिकृतौऽ
ष्टमाध्यायस्य प्रथमः पादः॥ ॥ वाजिनसोमपूर्वत्वं सौत्रामण्यां ग्रहेषु ताच्छब्द्यात्॥ चातुर्मास्येषु वाजिनं श्रूयते॥ वा
जिभ्यो वाजिनमिति सौत्रामण्यां च सुराग्रहाः। आश्विनं ग्रहं गृह्णाति सारस्वतमैंद्रमिति। तत्र संशयः। किं सुमयोः सोमिको
विध्यंतः। उत दार्शपौर्णमासिक इति। तदुच्यते। वाजिने सौ। त्रामण्यां च ग्रहेषु सोमपूर्वत्वं स्यात् सोमिको विध्यंतः। ताच्छब्द्यात्॥
सोमशब्दत्वात्॥ सोमशब्दस्तत्र श्रूयते। सोमो वै वाजिनं सुरा सोम इति। न तावद्वाजिनं सोमो न सुरा न च तयोः सो

नसादृश्यमस्तिसादृश्यप्रत्यक्षपरशावः परत्रवर्त्तते। तस्मात्सादृश्यमनुमीधीयते। सादृश्यंवात्रसोमधर्मत्वकृतं श
दित्यात्तु। नान्यत्। सएषनाम्नाधर्मातिदेशोनविध्यंतेनयथाकौंडपायिनामयनेग्निहोत्रे॥ ॥ अनुवषट्कारश्च॥ अ
नुवषट्कारंवसोमधर्म्मैर्दर्शयति। वाजिनस्याग्निर्वीहीत्यनुवषट्करोति। सुरायावीहीत्यनुवषट्करोतीति। सम्मुपहूयभ
क्षणञ्च॥ सम्मुपहूयभक्षणंवसोमधर्म्मस्तत्रदृश्यतेत्रापिसमेविभज्यसम्मुपहूयभक्षयंतीति॥ ॥ अथएषप्रपएपुरोरुच
पयानिग्रहणस्सादेनवासोपनहनवतधत॥ अथएगदीक्षसोमधर्म्मान्सुरायांदर्शयतिसीसेनक्लीबात्क्रय्याकुवल
सक्तुभिराश्विनंग्रहंगृह्णातीति। एकाधुरोरुग्गेकाया। स्याउपयामगृहीतोस्यश्विभ्यांत्वाश्विभ्रणायिवंनयरदंगृह्णातिगृह्णीत्वा
सादयतित्रिरात्रंसंहृतावसंतिहैमेवासुपनह्यनिनेकमानिशाख्यानिभवंतीति। विद्यैसमनेकार्थोभिवाकामिसु
रूपादीन्सीसकादींश्चविदधि। तस्मादुभयोः सौमिकोविध्यंतः॥ हविषांवानियम्यतेतद्विकारत्वात्॥ हविः सामान्येन राम
दर्शपौर्णमासिकोविध्यंतोनियम्यते। कुतः तद्विकारत्वात्॥ दर्शपौर्णमासिकस्येहविषोविकारः सुरावाजिने १०
मित्रीतिः सुरा। सान्नाय्यविकृतंवाजिनं॥ ॥ अमांसासोमभावः॥ अथयदुक्तंताच्छब्द्यादिति। तत्रसमः प्रशंसार्थयं

प्रवृत्तिः सोमशब्देन विध्यर्थे विधायकस्याभावात् । सोमो वैवाजिनं सुरा सोम इति । प्रत्यक्षफलवत्त्वात् सोम
स्य तद्भावे न सुरावाजिनयोः प्रशंसा । यथा सिंहो देवदत्त इति पुरुषस्य तस्मान्न्यायं नाम्ना धर्म्मातिदेशः ॥ वचनानीत
राणि । इतराणि तु सीसकुशादीनि वाचनिकानि । प्राप्तेरभावात् । अगत्या वचनानामनेकार्थता सगुणकर्म्मविधा
नेन ॥ व्यपदेशात्मकवत् ॥ ग्रावस्थैरेव दीक्षणीयामाप्नोति । तोक्मभिः आपणीयां सिंहलोमभिरातिथ्यामिति । सोम
विकारत्वे सति तस्यमेव दीक्षणीयादीनि प्राप्नुयुः प्राप्तानां ग्रावादिभिस्तदाप्रति वचनेनोपपद्यते ॥ ॥ पशुपुरोडाशस्य
वलिंगदर्शनं ॥ पशुपुरोडाशाता वचनाणि श्रूयते । नैतेषां पशूनां पुरोडाशा विद्यंते यह पुरोडाशा ह्येते पशुश्चावदंति
तन्त्रगतो वदत्र यहाः पुरोडाशा ग्रहा एव ते । यदि तु पुरोडाशा धर्म्मकास्ते तदेतदुपपद्यते । तस्मान्पौरोडाशिकान् तेषु विधत्ते
॥ ॥ पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ॥ अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः योदीक्षितो यदग्नीषोमीयं पशु
मालभत इति ॥ तत्र संदेहः किं पशुः पुरोडाशविकार उत सान्नाय्यविकार इति । किं प्राप्तं । पशुः पुरोडाशविकारः स्यात्
कुतः देवतासामान्यात् । अग्नीषोमीयः पशुः पुरोडाशोपि तद्देवत्य एव ॥ ॥ प्राप्ते ब्रू ॥ प्रोक्षणं पुरोडाशधर्म्मः पशो

दर्शयति। अग्न्यत्वोषधीभ्योऽनुष्टुब्धोऽक्ष्यामीतिपशुंप्रोक्षतीति॥ ॥पर्यग्निकरणञ्च॥ पर्यग्निकरणमपिपुरोडाशधर्म्मो
नरपिपशौदृश्यते। आहवनीयादुल्मुकेनपशुंपर्यग्निकरोतीति। तस्मात्पुरोडाशविकारः॥ ॥सान्नाय्यंवातत्प्रभवत्वात्॥
सान्नाय्यंवापशुर्विकुर्यान्नपुरोडाशः। कुतः। तत्प्रभवत्वात्। पशुतः सान्नाय्यंप्रभवतिपशुभ्यः। तस्मिन्पशुःप्रत्यासत्तं।प्रत्य
सन्निधिलिंगंहविः सामान्यंतदेवतत्सामान्याद्धृदीयस्तुक्तं। तस्यतत्पात्रदर्शनात्। तस्यतुसान्नाय्यस्यवैयत्नात्रमुखास
पशौदृश्यते। यदिपशुरुखायांपचेदिति॥ द्रव्यः स्यान्मूर्त्तिसामान्यात्॥ सान्नाय्यविकारोपिद्रव्योविकारः स्यात्पशुः। नप
यसः कुतः। मूर्त्तिसामान्यात्। घनत्वंमूर्त्तिः॥ ॥पयोवाकालसामान्यात्॥ पयोवापशुर्विकुर्यान्नदधिसद्यः कालः पशुः। प
योपिसद्यः कालं। दधितुअपरकालंपयोतरितितद्विहितं॥ पशुत्वानंतर्यात्। पशोश्चपयोनंतरंतत्प्रत्यासत्तंनदधि। द्रवत्वं
चाविशिष्टं। द्रवत्वंपशुपयसोः समानंपशुरपिद्रवति। पयोपि। तस्मात्पयसोविकारः पशुः॥ ॥आमिक्षोभयभाव्यत्वादुभय
विकारः स्यात्। वैश्वदेव्यामिक्षा उभयोर्दधिपयसोर्विकारः स्यात् उभयभाव्यत्वात्। उभाभ्यांहिसाभाव्यते। तत्रनपुन राम
नैवित्रोषोस्यैवनेतरस्येतितस्मादुभयोः एकंवाचोदनैकत्वात्। एकंवाविकुर्यात्। दधिपयोवानेनेवचोदनैकत्वात्। एकै १०

घावोदनावैश्वदेव्यामिक्षेति। सैकेनविध्यंतेननिराकांक्षीक्रियते।तस्मादेवं किं कुर्यात्। यत्नेनयुज्यतेविशेष इति। तत्रोच्य
ते॥ ॥दधिसंघातसामान्यात्॥ संदेहं तं तैर्दधिरामिक्षामित्यपिसंहतापयोद्रवमेषविशेषः तस्माद्दध्नो विकार इति॥ ॥पयोवा
तत्प्रधानत्वाल्लौकिकवत्तदर्थसंस्कारार्थत्वात्॥ पयोवा आमिक्षया विक्रियतेन दधिपयः प्रधानत्वादस्यसंसर्गस्य किं प्राधान्यं प
यसोभूयस्त्वात्प्रभूतं तत्र पयोल्पं दधि दध्यस्यातदर्थत्वात्॥ दधिवत्तत्र पयोघनीभावयितुमुपादीयते। लोकवल्लोकेपिप
यएवघनीभावयितुंदध्युपादीयते। कथं दध्यभावेऽप्यम्लेनाम्लेनापि नो कांजिकादिना क्रियते तत्रापि तेनामिक्षा साध्वी भवति।
दधिनियमोऽदृष्टार्थः तस्मात्पय एवाम्लसंयोगेन घनीभूतमामिक्षेत्युच्यते। पयस्त्वेरामिक्षा पयस एव विकार इत्यध्यक्षः॥
धर्मानुग्रहाच्च॥ सद्यः कालता धर्मः पयोविकारत्वेनुग्रहीष्यते। वैश्वदेवस्य सद्यःकालता दधिविकारत्वे बाध्येत। वैश्व
देवोपिह्यहःकालः क्रियेत। तथा तस्य धर्मो बाध्येत। सद्योभावं च दर्शयति। शृतं तां युज्यं पय इति॥ यदि दध्नो विकारः स्या
त्तथा द्व्यहकालभावे दातव्यं न कथंचन पयः स्यात् चैतद्दर्शनं नोपपद्यते। तस्मात्पयसो विकार आमिक्षा दध्यस्या धर्मकत्वं॥ सत्र
महीनश्च द्वादशाहस्तस्य भयथा प्रकृति रैककर्म्यात्॥ द्वादशाहो हर्गिणः प्रायणीयातिरात्रः षष्ठ्यः षडहस्त्वयस्त्वे

माश्रविवाकमहः उदयनीयोतिरात्र इति॥ स — यसंसक्तः सत्रमहीनश्चकथंज्ञायते। अभियुक्तानामुपदेशात्। ताए
वंमुपदिष्टं। तिसत्रमहीनश्चद्वादशाह इति। शास्त्रार्थविशेषमेवाभियुक्तोपदेशाः प्रमाणं। संज्ञाव्यवस्थयावातस्यधर्मा आम्नाते
एकोद्वौवहवोपिवाहीनेनयजेरन्॥ नाद्वैरीक्षितायाजयेयुः गृहपतिसप्तदशाः स्वयमृत्विजोब्राह्मणाः रात्रमुपेयुरित्येवमा
दयः धर्मभेदाश्चसंज्ञाव्यवस्थायथाब्राह्मणः परिव्राड्वानप्रस्थ इति ताद्दृशामेव्यापेवक्षते। द्वादशाहस्यसत्रत्वमासनोपापि
चोदनेयजमानवहुत्वसत्रशब्दाभिसंयोगाद्यजतिचोदनाद्हीनत्वंस्वाभिनोवाक्षिनपरिमाणत्वात् इति। सहिरात्रादिष
हर्गणेषुभवन्नेतद्रूपसंलुक्तंगणेषुद्वादशाहस्येति। तत्रेदंसंदिह्यते। किमुभयप्रकारोसौविकृतौप्रवर्त्तते उतव्यवस्थयाक्वचिद्दही
नभूतः क्वचित्सत्रभूतइति। किंप्राप्तं। तस्योभयथाप्रवृत्तिः स्यात्। उभयविधस्यचप्रवर्त्तेत। कुतः ऐककर्म्यात्। एकमिदंकर्मोभ
यविधमित्युक्तं। नतस्यप्रवृत्तौविशेषोगृह्यते। इहैवंविधंरूपेणेतितस्मादुभयविधंप्रवर्त्तेत। नन्वेकाचोदनाद्विधाप्रवृत्तौद्वितीयस्याम राम
र्थेनास्ति। एककर्म्यविकल्पोभविष्यति। यथाग्नेयविकारेस्वभिमर्शनस्य॥ अपिवायजतिशब्देनाहीनभूतप्रवृत्तिः स्यात्प्रक ११
तात्स्यशास्त्रत्वात्॥ अपिवानैतदेवंसर्वत्रोभयथाप्रवृत्तिरिति। यजतिचोदनायामहीनभूतस्यप्रवृत्तिः पारिशेष्यात्

यत्रासनोपायिचोदनात्त्रसत्रभूतस्य कस्मात्॥ प्रकृतत्वाद्वल्पशब्दलात् प्रकृत्या हि विकृतिस्तुल्पशब्दा भवति। तस्माच्चोदना
सामान्यात् प्रकृतिनियमः। अहीनभूतस्य यजति चोदनोद्धादशाहेन प्रजाकामो यजेतेति। सत्रभूतस्यासनोपायिचोदनो द्वादशा
हम् ऋद्धिकामा उपेयुर्द्वादशाहमृद्धिकामा उपासीरन्निति॥ ॥द्विरात्रादीनामेकादशरात्रान्तराहीनत्वं यजतिचोदनात्। अत्राहके नसे
हर्गणाः यजतिचोदनाः येऽहीनभूताः प्रवर्त्तते। केचासनोपायिचोदनाय पुसत्रभूतरूति। तदुच्यते। द्विरात्रादीनामेकादशरात्रा
दहीनत्वं। तत्राहीनभूताः प्रवर्त्तते। तेषां यजतिशब्देन चोदनात् द्विरात्रेणयजेतेति। त्रयोदशरात्रादिषु सत्रभूतस्वासनो
पायिचोदनात्त्रयोदशरात्रमृद्धिकामा उपेयुश्चतुर्दशरात्रं प्रतिष्ठाकामा उपासीरन्निति प्रकृत्याम्नातत्वात्। एवं वा यस्माद्यजति
चोदनो हीनस्तस्माद्द्विरात्रादीनामप्यहीनत्वं। ते पि हि यजतिचोदनाः यस्मादासनोपायिचोदनं सत्रं तस्मात्त्रयोदशरात्रादी
नि सत्राणि तान्यपि तत्रोदनानीति॥ लिंगाच्च॥ अग्निष्टोमो वै प्रजापतिः स उत्तरानेकाहानसृजत तमेतं द्विरात्रादयो हर्गणा
ऊचुस्त्वमस्माकमाहासीरिति तदेषामहीनत्वमिति द्विरात्रादीनामहीनत्वं दर्शयति॥ अन्यतरतोऽतिरात्रत्वात्संवत्सरात्रस्या
हीनत्वं कुंडपायिनामयनस्य व तद्भृतेष्वहीनत्वस्य दर्शनात्॥ पंचदशरात्रं कुंडपायिनामयनं चोभावप्यहीनौ। कस्मादन्य

तरतोतिरात्रत्वात्। उभावपि तावन्यतरतोतिरात्रौ तेनाहीनाविति पंचदशरात्रस्तावत्त्रिवृदग्निष्टुदग्निष्टोमः त्रिरात्रो
दशरात्र उदनीयोतिरात्र इति॥ कुंडपायिनामयनमपि मासमग्निहोत्रं जुहुतीत्यारभ्य यावद्द्वादशाहमहाव्रतं उदयनीयोति
रात्र इति। यश्चान्यतरतोतिरात्रः सोहीनः कथं ज्ञायते तद्भूतेष्वहीनत्वस्य दर्शनात्। तद्भूतेष्वन्यतरतोतिरात्रभूतेष्वहीनत्वं दृश्य
ते। यदन्यतरतोतिरात्रस्तेनाहीन इति॥ ॥ अहीनवचनात्॥ अहीन इति वायं पंचदशरात्रः प्रत्यक्षश्रूयते यदन्यतरतोतिरात्र
स्तेनाहीन इति॥ तस्मादप्यहीन इति॥ ॥८ सत्रे चोपायिचोदनात्॥ सत्रे चैते नाहीनौ कुतः उपायिचोदनात् य एवं भूतिकार्यमिछं
तः स्त एनं पंचदशरात्रमुपेयुः कुंडपायिनामयनेपि भूतिकामा उपेयुरिति। कः पुनरेतयोर्लिंगयोर्विशेषः चोदनान्तमेकं वा
क्यांतरगतमन्यच्चोदनागतं यत्तदंतरंगं भवति। बहिरंगमितरत्। अयं चापरो विशेषः अहीनलिंगेनहि निमित्तेनाहीनत्वं न
स्य संस्तुतिर्नोपपद्यते। उपपन्नैतदहीनत्वमुपायेते यदन्यतरतोतिरात्रस्तेनाहीन इति॥ सापि हि तावदुपपत्तिः साधिका नतोन्तरे राम
णापि वचनेधिकृमहीनत्वं। अथ न साधिका उच्यमानमपि न सिध्यति। तस्मान्नैतद्भवनं किं तर्हि नित्यानुवादोयं स्तुत्यर्थः स्तुतिश्च १३
अतेनाहीनलिंगेनान्यतरतोतिरात्रत्वेनाहीनस्यनोपपद्यते। यत्कारणं सर्वा एवाहीना अन्यतरतोतिरात्राः सत्रस्यत्वपपद्य

नायेनतावदयमन्यतरतोऽतिरात्रस्तेनाहीन आत्मनावसत्त्वं अतः उभयात्मा विशिष्टोऽयमन्येभ्यः सत्रेभ्य इति। सत्रलिंगं वद्धं
यति। सत्रलिंगं कुंडपायिनामयने दर्शयति। गृहपतिः सुब्रह्मण्यः सुब्रह्मण्य इति॥ गृहपतिर्हि सत्रे आम्नातः गृहपति सत्तस्था
सत्रमुपेयुरिति। सत्रे वर्तते नार्थः क्रत्वर्थं निर्याजमानान्कर्तुं। अन्येषां यजमानानां व्याप्तत्वात्॥ तस्मात्सत्रमेवैतदिति॥ ॥ इति मह
स्वामिवरचिते मीमांसाभाष्ये अष्टमस्य द्वितीयः पादः॥ ॥ हविर्गणे परमुत्तरस्य देवतासामान्यात्॥ इह हविर्गण उदाहरणं। आ
ग्नावैष्णवमेकादशकपालं निर्वपेत् सारस्वतं चरुं बार्हस्पत्यं चरुं॥ अग्नये पावकाय अग्नये शुचये इत्येवमादयः। तत्र चिंत्यते। किं
शुचिदेवतस्याग्नीषोमीयविकारः। आग्नावैष्णवस्याग्नेयविकारः उत विपर्यय इति। किं प्राप्तं। हविर्गणे परं शुचिदेवतं उत्तरस्याग्नी
षोमीयस्य विकारः पूर्वमप्याग्नावैष्णवं पूर्वस्याग्नेयस्य विकारः कुतः देवतासामान्यात् क्रमसामान्याद् इत्यर्थः॥ इह तु शुचिदेवतो द्विती
यः प्रकृतावप्यग्नीषोमीयो द्वितीय इतरत्रापि आग्नावैष्णवः प्रथमः॥ प्रकृतावप्याग्नेयः प्रथमः॥ देवतासामान्येन लिंगेन परमुत्तरा
पूर्वं पूर्वस्य विकारः॥ ॥ देवताया वा नियम्यमर्थात्पादवत्त्वाद् इतरस्याश्रुतित्वात्। न वा देवतेन नियमः स्यात्। किं तर्हि द्रव्यतया द्रव
व्यसामान्यात्॥ कुतः याद्धवती देवता आग्नावैष्णवमन्नपे शुचये इति। इतरस्य द्रव्यस्याश्रुतत्वाद् द्रव्यं न श्रूयते। किं तर्हि प्रवयाद्रव्य

तो किमतः एतदतो किमतः भवति। देवताप्रत्ययः कर्म्मचोदनायामनंतरत्वात् मुख्यः॥ उत्तरस्तु पौर्वापर्ये पिह्नयो लघते।
तस्माद्गुणभूतः॥ मुख्यानुग्रहस्य न्याय्यः। अतः श्रुतिद्वैते आग्नेयस्य विग्रंत आग्नावैष्णवेनाग्नीषोमीयस्य॥ ॥गणचोदनायाय
सलिंगतदावृत्तिः प्रतीयेताग्नेयवत्॥ न नक्रसमरात्रे श्रूयते। बलारित्रिवृंतसहस्राणि भवंतीति॥ तथान्यत्र श्रूयते। नवत्रिवृंतसह
नि भवंतीति। तत्र संदेहः किं प्राकृतस्य प्रथमस्याग्नेयस्याभ्यासः उत नाग्नाद्वादशाहिकानां सोमविधिरिति। किं प्राप्तं॥ गणचोद
नायायस्य लिंगेन तदावृत्तिः प्रतीयेताग्नेयवत्॥ गणचोदनायामेवं विधायां यस्य लिंगं प्राकृतस्य प्रथमस्याङ्गः। त्रिवृत्त्वं तस्यैवा
वृत्तिः प्रतीयेत चोदनासामान्यात्॥ आग्नेयवत् यथा तत्र अग्नये पावकाय अग्नये शुचये इति द्वैते का चोदनासामान्यादाग्ने
यस्य विग्रंताभ्यासः एवमिहापि॥ ॥ नानाहानि वा संघातत्वात् प्रवृत्तिलिंगेन चोदनात्॥ नानाहानि वा द्वादशाहिकानि प्रवर्त्ते
रन् न प्राकृतं प्रथममहः। कस्मात्। संघातत्वात्। संघात एष उच्यते॥ बलारित्रिवृंतसहस्राणीति पृथक्त्वे निवेशिनी द्विबलारी त्रि राम
संख्या पृथक्त्वेनाङ्गं भवतीति। संनिवतत्र समरात्रे चोदनया प्रवृत्तानि नानाहानि द्वादशाहिकानि बलारितान्यनूद्य त्रि १४
वृत्त्वं विधातुं शक्यते न तु त्रिवृंति बहूनि ग्रहान्यनूद्यत्र वतुः संख्या विधीयते। तथा वा नार्थदर्शनं बलारित्रिवृंतसहस्राणि

न्निष्टोममनुख्यानीति।येषामग्निष्टोमः॥प्रथमः इतरे निग्निष्टोमास्तएवमुक्ते प्रतीयंते। न एत सर्वे अग्निष्टोमाः यथा अयमुक्थं
पिंडेष्वेदनमित्युक्ते न सर्वाय संप्रतीयते। यदि चाग्निष्टोमोऽभ्यासः स्यात् सर्वे अग्निष्टोमा भवेयुः अग्निष्टोमो ह्यसौ तस्मात् द्वादशा
हिकानां वादशप्रायाणानामसंज्ञा त्रिषष्टान्नविधीयते। एवं नवत्रिवृंत सहानि भवंतीति॥ कालाभ्यासेपि वादरिः कर्मभेदात्॥ क्वचि
त्कर्मविशेषे श्रूयते षडहा भवंति चत्वारो भवंति पंच भवंति। तत्र संदेहः किं द्वादशाहिकानामसंज्ञाप्रवृत्तिः उत षडस्येति। किं प्राप्तं।
कालाभ्यासेपि वादरिः षडहकालाभ्यासेप्येतस्मिन् श्रूयमाणे वादरिराचार्यो द्वादशाहिकानामसंज्ञाप्रवृत्तिं मन्यते स्माकृतः॥ क
र्मभेदात्॥ षडहश्चाहेना द्वादशाहमिमिता निषट्सौताणि कर्माण्युच्यंते तेषां चषट्कानां भेदो गम्यते चत्वारः षडहा इति। पृथक्त्वनिवे
शात्संख्यायाः यद्येकस्यैव षडहस्य पार्ष्णिकस्याभिप्लविकस्य वाभ्यासः कल्प्येत ततः चत्वारः षडह इति स्यात्॥ अथ पुनश्चत्वारः
षडहा इत्युक्ते चतुर्विंशत्यहानि प्रतीयंते। सादृशः संघातवादना प्रकृतिलिंगत्वाद्द्वादशाहिकीमहः प्रवृत्तिं गच्छति। तस्मान्नाना
काद्वादशाहिकानां प्रवृत्तिः॥ ॥तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसंख्यत्वात्॥ तदावृत्तिं पार्ष्णिकस्यैवमन्यते स्य षडहस्यावृत्तिं जै
मिनिराचार्यो मेने। अह्नामप्रत्यक्षसंख्यत्वात्। चतुर्विंशतिरह्नामप्रत्यक्षा संख्यानुमानात् गम्यते। तस्माच्च षडहचतुष्टयेनै

५५

वःनुमानं तेन पूर्वं तावत् षडहवत्वष्टयमेव प्रत्येति। तत्समाहृत्य चतुर्विंशतिसंख्यां यथापूर्वं भूमं प्रतिपद्यते पश्चाद्दशि
यस्य भूमप्रत्ययेनैव कृतार्थो भवति नासावग्निप्रत्ययमाद्रियते। इहापि षडहप्रत्ययादेव तस्य दृष्टिः प्रसज्जते तत्पाव कृतार्थः॥
किं चतुर्विंशतिसंख्यया प्रतीतया करिष्यति॥ तस्मात्षडहाभ्यासः॥ अथ यदुक्तं पृथक्त्वनिवेशिनी संख्या आवृत्तौ वाध्येतेति। तत्र
भूमः षडह इति प्रत्ययात् षडहः संनिहितो गृह्यते। तस्य चतुः संख्यासंबंधः साक्षान्नास्तीत्याहत्य न भविष्यति। यथोपसंदप्रयाणा
नुयाजानां त्रसंख्यापि चतुर्विंशतिरात्रश्रुता। एवं षडहाद्येवं चोद्यते तत्स्यापि दशरात्रे प्रवर्तमाने आवृत्त्यैव संख्यापूरणे नि
न्नानां षडहानामभावात्। अभ्यासयोर्द्वेषो नासावेकपदं निवर्तयति॥॥ संख्यागणेषु तदभ्यासः प्रतीयते कृतलक्षणग्रह
णात्॥ इह संख्यागण उदाहरणं। अग्निष्टोमः पंचोक्थ्यः शतानि अग्निष्टोमं भवति। त्रातानि रात्रं भवतीत्येवमादयः। अत्र किं त
त्वेः किं ज्योतिष्टोमस्यायमभ्यास उतैवं संख्यानां संख्याविशिष्टानामभावाद इति किं प्राप्तं॥ संख्यागणेषु तदभ्यासः प्रतीय राम
ते। तस्यैव प्राकृतस्य ज्योतिष्टोमस्यायमभ्यासः। कुतः। कृतलक्षणग्रहणात्तत्स्यैतत्कृतलक्षणं। अग्निष्टोम उ[illegible]ः षोडशी १५
[illegible]तिरात्र इति तत्संयोगे नैताः संख्याउसंज्ञाः प्रतीताभिः श्रूयते तत्कृतलक्षणपितं। तं वल्लक्षणधि कासंख्याः केवलं विधास्यति नानाकृ

नुवादे संस्थासंख्यावोमर्थं विधीयते। उक्थ्यसंस्था भवंतीति सेव पंच भवंतीति तथा वाक्यं भिद्यते॥ तस्माज्ज्योति
ष्टोमाभ्यासः। अविकाराद्धि प्रकृतिसन्निधिशिष्टस्याभिधानस्य तल्लिंगभिन्नत्वात्॥ नैतदेवं ज्योतिष्टोमाभ्यास इति। कथं
तर्हि प्रकृतिस्तत्र विकृतिः स्यात्। द्वादशाहिकान्यहानि संस्थाविशिष्टानि स्युः॥ कस्मादधिकारात्। तान्यत्र चोदके
नाधिकृतानि। एवं चोदकानुग्रहो भविष्यति। ननु प्रकृत एव विहितो ज्योतिष्टोमाग्निष्टोमाभिः प्राद्यैर्नेत्याह। कथमभि
धानस्य तल्लिंगभिन्नत्वात्॥ अग्निष्टोमाभिधानं संस्थानिमित्तं न ज्योतिष्टोमाभिधायकं। तत्संस्थं क्रतुं वदितुं शक्नोति न ज्यो
तिष्टोममेव॥ यत्त्वनेकार्थमिति॥ नानेकार्थं भविष्यति। गणएवोदनया प्राप्ता नाम कार्यं वानां संस्थामात्रं विधायिष्यति।
शतानिष्टोममित्यपि समासः। उभयविशेषणविशिष्टं गणमाह॥ स एक एवार्थो यथा लोहितोष्णीषा ऋत्विजः प्र
चरेतीति॥ पृथक्त्वनिवेशिनी दैवे संख्या अनुग्रहीता भविष्यति। तस्माद्द्वादशाहिकानां नानात्वं वादः॥ ॥ गताद्युपव
यत्प्रकृतित्वात्। शतोक्थ्यं भवति चातुरात्रं भवतीति श्रूयते। तत्र द्वादशाहिकान्यहानि प्रवर्त्तंते। तानि व प्राप्याप्ये
उक्थ्यसंस्थानि ह्यवग्निष्टोमौ शतो उक्थ्यं भवतीति उक्ते अग्निष्टोमयोरुक्थ्यसंस्थोपपत्तेः प्राप्तः। शतातिरात्रं भवतीति सर्वे।

सुत्याविपर्ययोपवयः॥ तत्र चिंत्यते। किं द्वादशाहादुपवयः कर्तव्यः॥ उत ज्योतिष्टोमादिति किं प्राप्तं। गणादुपवय।
थः। तस्य प्रकृतित्वात्। द्वादशाहस्य प्रकृतत्वात् एतेष्वहर्गणेषु द्वादशाहिको विध्यंतः प्राप्यते। यदि द्वादशाहादुपवयए
३३ वं बोदकानुग्रहो भविष्यति। तस्माद्गणादुपवयः॥ ॥एकाहाहीनेषां समत्वात्स्यात्॥ एकाहाहीनज्योतिष्टोमादुपवयो न द्वा
दशाहात् कस्मात्। तयोः समत्वात्। द्वादशाहिकानामितरैर्वैहितैः समत्वेमवतिनामप्यन्यतः संख्यामात्रको भेदोऽतीति इमा साधि
दा ५ न वाभिषुक्ताभिषुक्तांकं द्वंतिसत्यन्यस्मिन्प्रसवसमर्थैः भिषुक्तेषु मेतदुक्तं न वति द्वादशाहे संख्यात्तो त्राम्नि अन्नाम्नाता
नीत्यतोप्यत्र आम्नातानि ततआकांक्षितिवेकैतेषु रः सुत्यादि नाम्नातानीति॥ तस्मादैकाहिकान्यप्यहानि यंच विहितानि तत ए
वाकांक्षितत्वमर्हति ज्योतिष्टोमवत्तान्यस्मात्तानि तस्माज्ज्योतिष्टोमादुपवयः॥ ॥गायत्रीषु भारतीनामवच्छेदः प्रकृत्यभि
रात्संख्यातारथिष्टोमवदत्यतिरेकात्तदाख्यातं॥ उपवयश्चिंतितः अपवयइदानीं चिंत्यते इदं श्रूयते। वाजपेयेन छादृ
हस्पतिसवेनयजेतेति। तत्रेदं समाम्नातं गायत्र्यमेतत्स्तुहर्नवतीति। अत्र विचार्यते किं प्राकृतीनां त्रिष्टुप्जगतीनाम राम १६
मरावलोपं कृत्वा गायत्रं तत्रदृः कर्तव्यं। उत तत्त्वेन नासत्रिगायत्रीणां द्वादशानां मध्यागमं कृत्वेति। अत्रेदमुच्यते एके पक्ष

मः गायत्रीषु प्राकृतीनामवच्छेदः॥ गायत्रीषु श्रूयमाणासु गायत्रमेतदहर्भवतीति प्राकृतीनां त्रिष्टुब्जगती
नामवच्छेदः अक्षरावलेपः कर्त्तव्यः प्रकृत्यधिकारात् चोदकेनात्र प्राकृत्यः त्रिष्टुब्जगत्यः प्राप्तास्त्रधिकृताविद्यंताय
घमासाम्रवामागमः क्षिपेतप्राकृताः मतयोवाध्येत। ननु प्रमत्तस्मश्रुतागम्यत्रास्ताभिश्चोदकप्राप्ताः तत्रबाधितव्याएवनेत्याः
ह। कस्मात्संख्यालात। अयं गायत्रीशब्दः संख्यावाचकः कथं ज्ञायते। अव्यतिरेकात् बहुविंशतिसंख्यामेवमन्वभिवरीत।
नक्षविंशत्चतुर्विंशतिसंख्यया विनादृष्टः॥ चतुर्विंशतिसंख्याहीनास्तु त्रिष्टुब्जगतीषु न कदाचिज्जायते। तस्मात्संख्यायां
दोषं। संख्यायां शब्दच्छेदः अक्षरावलेपः कर्त्तव्यः अविशिष्टोभवत। यथात्रानाम्निष्टोमे भवतीत्युक्ते द्वादशाहिकानामग्निष्टोमलो
पः क्षिपते। एवमिहापि। तल्लिंगवत्प्रत्यक्षतत्तोषु न वचनं॥ तल्लिंगवत्संख्यामात्रं श्रुतं गायत्रीषाद्रूमतत्प्रत्यक्षसती
षु प्रत्यक्षश्रुतासु गायत्रीष्वा जगतीषु गायत्रीषु तद्वचनं भवति। गायत्रीवचनं भवति येदि द्वेगायत्र्यो सैका जगतीति यदि सं
ख्यायां गायत्रीशब्दस्ततो जगत्यां चतुर्विंशतिसंख्यैवतद्वचनमुपपद्यते। अथ अत्र नतोऽन्यो जगत्यां न स्त इति एतद्व
चनमनुपपन्नं स्यात्। तस्मादपि संख्यायां गायत्रीशब्दः तथेदमपरं दर्शनं तिस्रोनुष्टुभश्चतस्रो गायत्र्यः करोतीति।

नविंशतौ दशेति चेन्न। अथ कश्चिद्ब्रूयात्। नविंशतौ दशसंख्या नास्ति। न संख्या संख्यांतरे वर्त्तते। गुणो हि संख्या न वस्तु
ण गुणे गुणो वर्त्तते। एवमष्टाचत्वारिंशत्संख्यायां चतुर्विंशतिसंख्या नास्ति। तस्मात्संख्यार्थमपि गायत्रीपादे एको जगतीच्छ
गायत्र्यो इत्येतदनुपपन्नमेव। यष्टौ भयो र्दोषो नासावेकस्य वाच्यः॥ एकसंख्यमेवस्यात्। अत्रोच्यते न ह्यमः संख्यायां संख्या
वर्त्तत इति किं तर्हि चत्वारिंशत्संख्यापरिच्छिन्ने च द्रव्ये अवयवभूते द्वे चतुर्विंशती संख्येन तु द्वे कथं वादिति। न च संख्या
संख्यांतरं निवर्त्तयति॥ यदि निवर्त्तयेदेकसंख्यमेव स्यात्। यस्य द्रव्यगा वक्तास्य द्वे पंचकौ गवामित्येतद्वचनं न स्यात्। भव
ति वतत्। तस्मान्न संख्या संख्यांतरं निवर्त्तयति॥ एवं वा। नविंशतौ दशेति चेत्। यद्यपि संख्यायां गायत्रीशब्दः एवमपि ना
तावलोपः कर्त्तव्यः विकारणं। विंशतौ दशाविद्यते। किमतः इदं तावदतः येन विंशतिरूपा त्वातेन दशा भवंति। एवं येन त्रिष्टुप्
जगत्यः प्रयुक्ताः तेन तदंतर्गता गायत्र्यो भवंति। तस्माद विकारेण प्रयोगः। एवं चेद्दकानुग्रहश्च भवति। गायत्रं वा छंदः एतेन
वति। एकसंख्यमेवस्यात्। अत्राह। जगत्यो त्रिष्टुभि वोपात्तायां न गायत्र्य उपात्ता भवंति। कथं साधने परिच्छिंदंती संख्या
कर्मेण्यंगी भवति। न जगत्यास्त्रिष्टुभो वा वयवः साधने किं तर्हि त्रिष्टुप्प्रसृत गत्यः। अथोच्येत गायत्रमेतद् इहेर्नवती

वचनादवयवएवात्रसाधनमितितथासत्यजरावलोपएवप्राप्नोति। उत्तरस्यावयवस्यानंगत्वात्। नवानेगोत्रनुप
दीयमानेनेदंक्रोनाप्यते। तस्मादुक्तं यद्यपिसंख्यायां गायत्री। शब्द एवमप्यविकारेण प्रयोगइति एतदुक्तंस्मृक्तंरत्र्यतिन
वेत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवंतीति यदयमेकार्थंदत्ता। एवंशतंवसहस्रं वपरार्द्धं वेति सर्वसंख्यात्र
नुक्रामति। यदित्वोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवंति ऐकसंख्यमेव स्यात्।। एकैवपरार्द्धसंख्या भवेत्
साहिसर्वाभ्य उत्तरा यतस्त्वेकाद्या अप्यनुक्रांताः अतो विज्ञापते नोत्तरसंख्यायां उपात्तायां पूर्वाः संख्या उपात्ता भवंतीति।
गुणवाद्द्रव्यशब्दस्यादसर्वविषयत्वात्।। नैतदेवं। संख्यायां गायत्रीशब्द इति। कथं तर्हि गुणेत द्रव्यशब्दः स्यात्। वतर्वि
शतसहस्रयुक्तस्य द्रव्यस्यवाचकः कस्मादसर्वविषयत्वात्। यदि संख्याशब्दः स्यात् सर्वस्मिं अत्रुर्विंशति संख्यासंख्येयव
र्त्तिगोपृष्ठादीनवर्त्तेत। तस्मात्न संख्याशब्दः।। ।।गोत्ववद्वसमन्वयः।। यथा गौरिति सत्यपि गमननिमित्ते सामान्यद्रव्या
भिधानेसास्नादिमत्स्वेवसमन्वयो नान्यत्रेति तद्वचनएवगोशब्दो विज्ञायते। एवमयमपि अप्येवचनएव विज्ञातुं नाप्यः।।
संख्यायामशादवत्वात्।। वद्विंशतिसंख्यावाचकः शब्दोत्ति वतुर्विंशतिरिति। नास्या अपरेण गायत्रीशब्देनार्थः संत

ज्ञामाव्यवहारार्थत्वात् एकेनव्यवहारसिद्धेः॥ ॥इतरस्याश्चतित्वात्॥ इतरस्य अग्नेर्वै गृत्स्यश्याश्चतित्वादक्षराक्षरत्वादि
त्यर्थः तस्यापिव्यवहारार्थेन संज्ञाशब्देन प्रयोजनं तत्रायं गायत्रीशब्दोर्थवान् भवति। संख्यायोनिः प्रयोजनं तस्मादपि अ
क्षरान्याप्यः अतो गायत्र्यां एकस्य वर्णागमः कर्तव्य इति॥ ॥व्यंजनांतरेण निवेशः॥ उक्तलोपैर्विशिष्टस्यात्॥ यदुपवर्णितमनिष्टे
मवदिति॥ तत्रक्रमः अग्निष्टोमम्। वृहस्पदव्यंजनान्तरेण स्मिं श्चिन्निवेशो नास्ति। यथा गायत्रीशब्दस्याग्रे अयं हि केवलानिष्टोमोत
तं यत्तेन वो लोपमंतरेण द्वादशाक्षिकानाम अग्निष्टोमं न नाम भवति सवर्णपकार्य उ लोपः अयं पुनर्गायत्रीशब्दः
स्यवाशयस्यवाक्षरत्वमित्युक्तं नवाक्षरावलोपेन तदक्षं प्राप्यते। तस्माद्विषमोयमुपन्यास इति॥ ॥अशास्त्रलक्षणत्वात्॥ अशास्त्र
लक्षणेन निवेशे शास्त्राणिनामग्निष्टोमत्वं निशास्त्रलक्षणया अग्निष्टोमो न तया वा भवेत। इह पुनर्विपरीतं शास्त्रलक्षणाग
गम्यत्रानुमानिकाश्चिष्टशागमस्मान्नवाक्षरवद्गायत्रीवाक्यस्ति॥ ॥उत्पत्तिनामधेयत्वात्॥ नमस्यापृथक्सतीषु स्यात् अ
थ यदुक्तं संख्यातो गायत्रीशब्दो दृष्टो यथा द्विगायत्र्यौ सैका जगतीति तस्योत्तरः परिहार उच्यते। उत्पत्तिक्रमे तद्देवनामधेयमि राम
त्युक्तं अत उत्पत्तिनामधेयत्वादयं जगत्यवयव वेवतुर्विंशत्यक्षरपदसंबंधनयोगः समन्तात् विशेषः नैव कृत्स्नशब्दस्याने १८

कार्थतासत्संगतेन्याप्या। कथा पुनर्जगत्याः परिमाणसाम्यात् तयत्परिमाणसामान्यात्। तयत्परिमाणं द्वयोर्गायत्र्योरेकदेश्य
जगत्याः अत एव तु क्तं यद्द्वे गायत्र्यौ सैका जगतीति। यथा यौ द्वौ क्षौरवौ स एको वाही क इति। एतच्च गायत्री द्वयमन्त्रांशार्थवचनेकत्वेनापि
दृश्यते। द्वाभ्यां गायत्रीभ्यां वैरूप्यस्येति। तदेतदयुक्तमिवोच्यते। जगत्या वैरूप्यस्य कार्यं संगतेः क्व वैरूप्यः तदेतद्द्वाभ्यां गायत्रीभ्यां
यत्तेजगत्यैव तत्कृतं भवति। यद्द्वे गायत्र्यौ सैका जगतीति। तस्मादस्तु रथंतरस्यार्थे ले गायत्रीच्छंदस्त्वं। वचनमिति चेत्। यावद्वाय
चैनं तत्रैव बहुत्वं पत्रानुवादो गायत्रीच्छंदः यत्र तु विधिस्तत्र कथं यथा त्रिष्टुब्जगत्यौ गायत्रीः करोतीति। कः पुनर्विशेषो विदे
षे विधौ च्छंदार्थेन व्यवहारो भवति। त्रिष्टुब्जगत्यौ गायत्र्यौ न यज्ञार्थाः कर्तुं। ज्ञातव्यास्तु वक्तव्यः स्तुतिविरातयः तस्मात्तत्र संख्या
यं गायत्रीच्छंद इति। अत्र ब्रूमः यावदुक्तं। इह वैकृतसंख्यार्थो नान्यत्र क्वचिद्दर्शनात्तात्पर्यात्। यद्येवं संख्यावचनः कथमिहसं
ख्यार्थो जात इति। उच्यते। लक्षणया पिपिबानं भवति यथा लोके त्रयमी पिष्टपिंडाः सिराः क्रियंतामिति। वेदेपि पृष्ठैरुपतिष्ठंत इति।
न वक्तव्यं सिंहव्याद्यः प्रतिकृतिवचनोदृष्टस्तत्रापि प्रतिकृतिवचनो विज्ञायते। एवं छन्दो वा मंत्रवचनेनेन लक्षणया मयो
गेच्छन्दार्थः परिच्छिद्यते यत्कारणं स्वार्थे। एवं वर्तमानो र्थांतरं लक्षयति। स्वार्थे जरुन्नैवलक्षयेत तस्मादयमप्यहेतुः॥ ॥ अथ

वैव विकल्पः स्याद्यदि संख्याभिधानं॥ अपूर्वैव दर्शपूर्णमासकर्मणि विकल्पः॥ स्यात्तयदि संख्यायां गायत्रीशब्दस्तत्र हि स्तू
यते। गायत्र्या परिदध्यादिति। एवं श्रुते त्र्यानुरूपाभ्यां चतुर्विंशत्यक्षरस्य पदस्यैव अस्यैव विकल्पः स्यात्॥ विकल्पपक्षे त्र्यनुष्टुभा याव
द्यः सर्वा पुनः सर्वा गता तस्मादपि नैतत्संख्याविधानं॥ ॥ अगुणत्वान्नेति चेन्न। अत्रोच्यते। न प्रसक्तो विकल्पो भविष्यति। कुतः अ
गुणत्वात्। अगुणो हि तत्र प्रयोगो त्र्यंशी ह्यतः स्वतन्त्रस्य सामिधेन्य आम्नाताः; यद्यनुष्टुप्परिदध्यात् अगुणत्वं बाध्येत। तस्मात्तत्रा
नुष्टुप्तयैव परिधास्यति। तथा सति गायत्र्या परिहितं भविष्यति। अगुणत्वं नोपगृहीतं॥ ॥ तत्र पूर्वपक्षस्तस्मात्॥ पूर्ववत्त्वपि ह्रस्व
ति स चेत्तथा स्यात्। यथा पूर्वे त्र्यापि अगुणकः; प्रयोगो गीहृतश्चोदकेन तत्रापि शब्दरूपादीयमानास्तु गायत्र्ये वैवाङ्गः तत्तं भव
ति। अगुणकत्वं च न बाधितं। तस्मान्नास्ति त्वविलोपः॥ ॥ गुणवेदाश्च सर्वत्र॥ तत्र शब्दसंख्याने वरादः; दृष्टश्च तद्राशब्दस्यार्थेव
शब्दः; यथा द्विवेह भवति इति॥ गुणस्य वत्तु विंशति संख्यायः सर्वत्र वेद्याः; कृत्स्नायामानुरूप्ये तस्यां नावमेव ज्ञातस्य स्यात्पादी
यमाना। नास्त्यगुणत्वं चोपगृहीतं भवति। संख्यावत्। इह स्यात्सर्व पुनः यावत्कः केस्तूनां गीतानां सामवपदेव चतुर्विंशतिसं
ख्यानि विद्यावंतस्मिन्नुपादीयमाने अगुणत्वमनुग्राह्यं भवति। प्रकृतिगायत्री पुनरूपा नैव भवति। तस्मान्न संख्याभिधाने गाय

मा॰

त्रीशब्दे प्लुतिगायत्र्यामेणे गैरमः प्राप्नोति। अपर आह। इदं तावदयं संख्यावादी प्रष्टव्यः॥ कस्मादक्षरगतायामेव संख्यायां
भवानवस्थितो न पुनरन्यसंख्येयगतायामपि यदृगतायां वा मसगतायां वा यतो विशेषेण श्रुतं गायत्र्यमेतदष्टाक्षरं भवतीति। ए
वं सति सर्वत्र गुणे वृत्त्या प्राप्नोति। निष्पन्नयरूपेण नेति चेत्॥ सर्वे स्वर्गात्र्यायं भिषजा गायत्रीशब्दः प्रसिद्धस्तस्यार्थः। तस्य अक्ष
रेणाख्यः। अयं वाक्षरगताया मेव संख्याया प्रसिद्धेन सर्वत्र तस्मान्न सर्वसंख्येयगते गृह्यत इति सर्वत्र न्याय्यम्॥ ॥ नन्वक्षरेष्वपि स्यात्
यथा अक्षरगतायामेव संख्यायां दृष्टो नान्यत्र एवमृक्षेव दृष्टो नान्यस्मिन् ऋतु विंशत्यक्षरे गच्छे वा। यथा वाक्षरेष्वेव दृष्ट इति ना
न्यत्र विज्ञायते। एवमृक्षु दृष्ट इति नाप्यनृक्षु विज्ञातुं न्याय्यः॥ अत्राह। यद्यप्युक्तं गायत्र्यादय एवमप्यक्षरावलोपः कार्यः॥
किं कारणं प्लुत उपबन्धनात्॥ चोदकेनात्र प्राकृतमस्त्येव दूरन्गलः। प्रपितामहो दमानो प्रिन्नता भविष्यंति गायत्र्याद्याः संख्या स
मान्या। छन्दोनित दश यत्नान्वक्लृप्तमेव च मोदिवीयन्नुगृहीतो भविष्यतः। आह तो वैष्णवं श्रुतिः। अत उत्तरं पठति। यदि वा अवि ज्ञाये
नियमः प्लुत उपबन्धनार्थे। आगमश्रोत गायत्र्याद्यः कल्प्यते त्वारे ध्वपि शारन्मयं वर्णैर्न भवतीति कुत्रापु द्वारशारदः कल्पयितव्यः
कौशमेव वर्णैः कार्यं वक्तव्यो वा विशेषः। दृष्टः प्रयोग इति चेत्॥ अयं विशेषः दृष्टः श्रुतुर्विंशति संख्यायामक्षरगतायां गाय
त्रेष्वपि प्रसिद्धं स्यात्। यथा विशाये आसंश्राये पि गायत्री श्रुतिविहिता तस्यप्रच्छन्दस्कं उपबन्धनारः

त्रीशाहस्य प्रयोगः। ये द्वे गायत्र्यौ सैका जगतीति। तेन शक्यते कल्पयितुं॥ ॥ तथा शारेष्वपि॥ शारस्त्राहस्याधिकुशेषु प्रयोगो

दृश्यते। शारवणमेवेदं कुशावनमिति॥ ॥ न शेषत्वेनेत्यत्रोच्यते। सतत्र शारस्त्राहे भाक्तः प्रयुज्यते। दीर्घत्वान्न ह्यपुपत्रत्वात्साह

श्यवादे सो शारवणमेवेदं कुशावनमिति स्वार्थे वर्तमानः साहश्यं गमयति स्वार्थं तु न लक्षयं गमयेत्। तस्मादुरेष्वेव तत्र शार

शाहस्य प्रयोगो न कुशेष्विति॥ ॥ तथेतरस्मिन्॥ तथा इतरस्मिन्नपि ये द्वे गायत्र्यौ सैका जगतीति विभाग एव गायत्रीशाहद

त्वेसो पि स्वार्थ एव वर्तमानस्तत्सादृश्यं गमयतीति न द्वेवमयुक्तेन सं ख्यायां। तस्मात्स्मात् संख्यायां गायत्रीशाहश्चतेनेह

तावल्लोपः कर्तव्यः॥ ॥ अर्थैकत्वाद्वा समानात्वान्नतासायेकदेशत्वात्॥ अपि च त्रिष्टुब्जगतीनामेकदेशो वाक्यमपरिसमाप्तं

भवति। न वा परिसमाप्तेन वाक्येनार्थः कश्चिदभिधीयते। अर्थाभिधानार्थश्च मंत्रप्रयोगस्तत्र मंत्रप्रयोग एवानर्थकः स्यात्

तस्मान्नतासो त्रिष्टुब्जगतीनामेकदेशो गायत्रीशाहः स्यात्। तस्मादुत्पत्तिगायत्रीणामेव दाशतयीमः आगमः कर्तव्य इ राम

ति॥ ॥ इति श्रीशाबरभाष्ये अष्टमस्य तृतीयः पादः॥ ॥ दर्विहोमोऽयज्ञाभिधानं होमसंयोगात्॥ यद्येकया जुहुयात् दर्विहोमं १०

कुर्यादिति श्रूयते। अस्ति च दर्विहोमो नाम भवति संशयः। किं गुणविधिः। उत कर्मनामधेयमिति। किं प्राप्तं। दर्विहोमोऽय

नाभिधानं। कर्म्मनामधेयमित्यर्थः॥ होमसंयोगात्॥ होमशब्दो ह्यत्र श्रूयते। तस्मात्प्रधानश्चायं समासो दर्व्विहोम इत्युपसर्ज्जनं। हो
मश्च कर्म्म। अथ यान्तु ज्यादिति कर्म्मोच्यते। तेन सम्बन्धितो यदेकया जुहुयादिति। तस्मात्कर्म्मनामधेयं सिद्धं तावत्। ततो ऽर्थान्तरं
क्रियते॥ ॥सलौकिकानां स्यात्कर्तुस्तदाख्यत्वात्॥ यदा कर्म्मनामधेयं तदा विंत्यते। किं लौकिकानां स्मार्त्तानां कर्म्मणामष्टकादीनां ना
मधेयं दर्व्विहोमशब्द उत सर्व्वेषामेव लौकिकानां वैदिकानामिति। किं प्राप्तं॥ सलौकिकानां स्यात् सर्व्वेषान्तु दर्व्विहोमशब्दो लौकिकानां कर्म्मणां नामधेयं स्या
त्। कुतः। कर्तुस्तदाख्यत्वात्। तेषां कर्त्ता तेन दर्व्विहोमशब्देन समाख्यायते। स्मार्त्तानां दार्व्विहोमिको ब्राह्मणः श्रौतानां दार्व्विहोमिको ब्राह्म
ण इति। यथा पत्नी इति सा तेनोच्यते। यथा लौकिकः पावक इति। यदि चाष्टकादीनां नामधेयमेतत् ततस्तेषां कर्म्मणां कर्त्ता दार्व्विहोमिकः स्म
र्यमाण इतीति। तस्माल्लौकिकानां नामधेयं॥ सर्व्वेषां वा दर्शनाद्वास्तुहोमे। सर्व्वेषां वा लौकिकानां वैदिकानां च नामधेयमेतत्। नलौ
किकानामेव। कस्माद्दर्शनाद्वास्तुहोमे वास्तुहोमे हि वैदिके दर्व्विहोमत्वं दर्शयति। यदेकया जुहुयाद्दर्व्विहोमं कुर्यात् पुरोनुवाक्यामनूच्य
याज्यया जुहोति सदेवतत्वायेति। ननु विपरीतमेतद्दृश्यते यदेकया जुहुयाद्दर्व्विहोमं कुर्याद्दर्व्विहोमं सन्तमिताप्यते। यदि दर्व्विहोम
एवासौ तत एव प्राप्यमाणो दर्व्विहोमो भवति॥ अलौकिकत्वात्तत्रैतद्वचनं नोपपद्यते। यदेकया जुहुयाद्दर्व्विहोमं कुर्यादि
त्यत्रैतद्दर्शनं नोपपद्यते। यदेकया जुहुयाद्दर्व्विहोमं कुर्यादिति। अत्रोच्यते। यदि लौकिकानां नामधेयं नाम्ने
वनामधेयेन वैदिकानां तत एकयापि हूयमानो सो नैव दर्व्विहोमो भवति। ९

नितस्मात्तलापकमेवेदं वैदिकानां दर्विहोमत्वं एवमपि तत्लापकमुक्तं। कुतः॥ आशिः उच्यते। होममंत्रा दृष्यसामान्यानि आपादित्वा व्याप्तिः।
।तस्माल्लौकिकवैदिकानां नामधेयमेतत्॥ जुहोतिचोदनानां वा तत्संयोगात्॥ लौकिकानां वैदिकानां च नामधेयं दर्विहोममंत्राद् इतिस्थितं तद्
दानीं चिंत्यते। किं यजतिचोदनानां जुहोतिचोदनानां च सर्वेषां नामधेयमुत जुहोतिचोदनानामेवेति। अविशेषात् सर्वेषां इति प्राप्त उ
च्यते जुहोतीनां नामधेयं न यजतीनां। कुतः तत्संयोगात् होममंत्राद् संयोगात्॥ अथ होममंत्रा द्वे जुहोतेर्वा तत्॥ न यजतेर्यं जतौ लक्षणया
स्यात्॥ तस्मात् जुहोति नामधेयं॥ द्रव्योपदेशाद्वा गुणाभिधानं स्यात्॥ स्थिताउत्तरमुच्यते। यदुक्तं कर्मनामधेयं दर्विहोम इति। तन्न किं
तर्हि गुणाभिधानं स्यात्। गुणविधिरित्यर्थः। कुतः द्रव्योपदेशात्। द्रव्योपदेशो वगम्यते। दर्व्या होमो दर्विहोम इति एवमेतो दर्विहोममंत्रादेय
था असिधिकस्येनोपविश्यतः। तस्मात् गुणविधिः॥ न लौकिकानामाचारग्रहणत्वात् शब्दवतां चान्यार्थविधानात्॥ नायं गुणविधिरुच्यते।
किं कारणं। लौकिकानां ताबदाचारगृहीता दर्विः स्त्रचा स्थालिया मूलदंड्या दर्व्या जुहोति इति तान् विधातव्याश्रौता नामप्यन्यानि होमार्थ्या राम
भिधानाम्नातानि स्रुवेण जुहोति चमसेन जुहोतीति। तैः सह दर्वैर्विकल्पः स्यात्। सर्वान्याय्यः॥ सत्कारणं स्रुवादीनां विधायकं। श्रा २१
ता दोर्मिस्रुवेण जुहोतीति। न तु दर्वैस्तत्र शास्त्रानुमानिको विधिः शब्दः॥ दर्विनो वान्यपात्रस्य॥ अनाश्रपात्रे दर्विहोमे दृश्यते। नृतेष्य स्त्रतु

हर्वैस्रुवेण स्रुचा जुहोतीति। तस्मान्न गुणविधिः॥ तथाग्निहविषोः॥ अथोच्यते अग्निहविषोः कार्ये दर्विर्भविष्यति। दर्व्यैर्होमो दर्विहोमे
दर्व्या वा होमो दर्विहोम इति। तत्र चूर्णमस्याग्निहविषोरपि। यथा पात्रकार्ये दर्विर्नियुज्यते तथाग्निहविषोः कार्येपि तत्राप्याहवनीय आधा
रत्वेन विहितो यदाहवनीये जुहोतीति। अन्यत्र पदेयत्वेन पुरोडाशादि। तस्मादग्निहविषोरपि कार्ये न दर्विर्निवेश्या॥ उक्तमर्थ्यसंबंधः
॥ उक्तं वा सन्निधिरग्नेः कार्ये अन्यद्द्रव्यमसमर्थं। दहनपचनप्रकाशनकर्माग्नेः न चैतत्कार्यमन्यद्द्रव्यं शक्नोति कर्तुमिति। तस्मान्ना
ग्निकार्ये दर्व्युपदेशः अतो न गुणविधिः कर्म्मनामधेयमेव दर्विहोमशब्द इति॥ ॥दर्विहोमशब्दः कर्म्मनामधेयमित्युक्तं। तत्र किं
नु किमहरहर्वा दर्विहोमाः उत क्रतुतन्त्रे कर्मण्याहिता इति। किं प्राप्तं नाहर्वा उक्ता। कुतः इतिकर्त्तव्यता विधेरविहितेतिकर्त्तव्यताकं कर्म्म
विहितेतिकर्त्तव्यताकान् धर्म्मानुपदिशन्तीत्युक्तं। अविहितेतिकर्त्तव्यताकश्चामी। तस्मात्पूर्ववन्त इति। यदैतदेवं। तदैतदापतति। किं हर्वाद
ति। अत्रोच्यते। तस्मिन् सोमः प्रवर्त्तेताव्यक्तत्वात्॥ तस्मिंश्च खलु दर्विहोमे सोमः प्रवर्त्तेते। सौमिको विध्यन्तस्स्यात्। कुतः अव्यक्तत्वात्। अ
व्यक्तचोदनः सोमः॥ अमी अपि चाव्यक्तचोदना मिन्ने जुहोतीति। अतश्चोदनासामान्यात् सौमिको विध्यन्त इति॥ ॥न वा स्वाहाकारेण सं
योगाद्वषट्कारस्य च निर्देशात्तैश्च तेन विप्रतिषेधात्॥ वा शब्दः पक्षं व्यावर्त्तयति। नात्र सौमिको विध्यन्तो न्याय्यः। किं कारणं स्वाहाकारे

व॰

ण संयोगात्। स्वाहाकारेण संयुक्ता दर्विहोमाः पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति॥ किमतो वषट्कारस्य निर्दिष्टत्वात् तेन च विप्रति
षेधः॥ तत्र च सौमिके वषट्कारो निर्दिष्टः तेनास्य विप्रतिषेधः उभयोः प्रदानार्थत्वात्। यदि सौमिको विध्यंतः ततो वषट्कारेण भवितव्यं॥
न चैतत् स्वाहाकाराम्नानमनर्थकं स्यात्। अथ विकल्पः क्रियते। तथाप्युभयोः पक्षे बाधः अथ त्वपूर्वा दर्विहोमाः नैष विरोधो भविष्यति।
तस्मादपूर्वाः॥ ॥ शब्दान्तरत्वात्। शब्दान्तरं चैव यजतिशब्दाज्जुहोतिशब्दः। यजतिचोदनश्च सोमः दर्विहोमाः पुनर्जुहोतिचोदनाः चोदना
सामान्येन धर्मप्राप्तिरिष्यते तस्मादपूर्वाः सौमिकी धर्मप्राप्तिः न च व्यक्तत्वाच्चोदनासामान्यमुक्तं। अत्रोच्यते सामान्ये व्यक्त
त्वे यजतिशब्दो विशेषलिंगं तेन यन्निमत्तं चाम ... धर्मनियमो यथा समाने त्र्यवदानत्वे देवतैकत्वेन विशेषलिंगेन सौमिकर्म
ण अपि विध्यंत इति। लिंगदर्शनाच्च॥ लिंगदर्शनाच्चैतद्विज्ञायते। नात्र सौमिको विध्यंत इति। औदुंबरीहोमे हि स्वाहाकारं विधाय जुहोति विष
रे वा केवरशीमति। एतेन द्यावापृथिवीभ्यां एवं तं तरा वषडित्येव जुहोति। आम्नातादवस्त्वावधति। भूमिगते स्वाहाकरोतीति। यद्यत्र सौमिको वि
ध्यन्त इति। औदुंबरीहोमे हि स्वाहाकारे वषट्कारस्तेन भवेन्न स्वाहाकारः॥ उत्तरार्थं तु स्वाहाकारो यथासामर्थ्यं तत्राविमर्षेपि द्रापु
नः सप्तमिर्लिंगदर्शनात् तद्वत्। लिंगदर्शनस्य परिहार उच्यते। यदुक्तमौदुंबरीहोमे सिद्धवत् स्वाहाकारस्य दर्शनान्न सौमिको विध्यंत इति।

पर्यप

राम
२२

अत्र ब्रूमः उत्तरार्थस्तु स्वाहाकारो यथा सांनाय्यदेवत्यं तौ। तद्यथा सांनाय्यदेवत्यमनारभ्याधीतं सन्नद्द्यासामिधेनीरन्वाहेत्यनारभ्यवा
दानां पद्धत्यर्थत्वात्। दर्शपूर्णमासावागतं ततः प्राकरणिकेन पांचदश्येन बाधितं साप्तदशत्वं सर्वे जातं। एवमयं स्वाहाकारो नारभ्याधी
तः स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयत इति तेनैव न्यायेन प्रकृतिं निविशते। सोमं दर्शपूर्णमासौ वेतनस्तावेव वष
ट्कारेणोपरुद्धत्वाद्दर्शमन्यानि प्रदानान्युपसंक्रामति। तत्र विप्रतिषिद्धा सोमधर्मप्रवृत्तिः पशुवत्। तद्यथा पशौ सान्नाय्यदेवत्ये क्रियमाणे
न दर्शपूर्णमासिकी तत्र प्रवृत्तिर्विप्रतिषिध्यते। बाधनिकृत्वात् सान्नाय्यस्य। एवमिहापि वादनिकृत्वात् स्वाहाकारं प्रति लिंगदर्शना
न्नसौमिकधर्मप्रवृत्तिर्विप्रतिषिध्यते। पुनः स्वाहास्थानर्थको यथा किं पुनरिदमिति॥ ॥अनुत्तरार्थो वार्थवत्त्वादानर्थक्ये हि प्राकृत
स्योपरोधः स्यात्। यदुक्तमुत्तरार्थः स्वाहाकार इति तन्न। कुतः। अनुत्तरार्थोऽर्थवत्त्वात्। प्रकृतावेवास्यार्थवत्त्वं नारिष्टहोमेषु पार्वणहोम
योश्च सर्वस्यास्तु। अग्नये स्वाहेति। अनर्थकत्वाद्धि प्राकृतस्योपरोधः स्यात्। यदि प्रकृतावनर्थकः स्यात् स्वाहाकारस्ततः प्राकृतस्य वषट्कार
स्यापि दृष्टौ प्राप्तस्यानारभ्यवादेन सा उपरोधो वषट्कारबाध इत्यर्थः। न त्वस्यानर्थक्यं तस्मान्नोत्तरार्थः। न चेदुत्तरार्थो लिंगमेवैतद्भवति
असोमयाजित्वे दर्विहोमानां भूमिगतस्वाहाकरोतीति॥ ॥ नमस्कारेव पीति वेन॥ एवं चेत्तत्पक्षे नारिष्टहोमेषु पार्वणहोमयोः स्वाहा
ना १

कारस्य निवेशः इति। प्रकृतावपि नारिष्टहोमादौ नास्य निवेशो घटते। तत्रापि वषट्कार एव प्राप्नोति। सत्यं विशेषेण दर्शपूर्णमासयो
र्विहितो ऽक्षरो वषट्कार एष वै प्रजापतिः सप्तदशो यज्ञे ऽन्वायत्त इति। ननु स्वाहाकारोऽपि प्रत्यक्षं पठितः। सत्यं पठितो वषट्कारस्तु विहितो ऽ
तः प्रतिदेशेन नास्य यज्ञो ऽभ्यते प्रजापतौ यत्ते न प्रतिष्ठनीति स्वाहाकारं पाठे न मा प्रवैधं बाध्यते। पाठे ह्यानुमानिको विधिः प्रत्यक्षेण विधि
ना बाध्यते। न चेदत्रापि निवेशः उभयार्थ एव स्वाहाकारो भवति विकल्पार्थः॥ ॥ उक्ते समवाये परदौर्बल्यम्॥ अत्राह। नं तद्धुक्ते वषट्कारेण स्वा
हाकारो बाध्यत इति। कुतो यत उक्तं श्रुत्यादीनां समवाये परस्य दुर्बलत्वं। इह च वाक्यप्रकरणयोः सन्निपातः। प्रकरणेन वषट्कारः प्राप्नोति
नारिष्टहोमेषु तन्मन्त्रपदैरेकवाक्यत्वात् स्वाहाकारः वाक्यं च प्रकरणाद्बलीयः। ननु स्वाहाकारस्योपरिष्टात् प्रदानार्थो वषट्कारः प्रयुज्य
ते। न खलु स्वाहाकारेण वषट्प्रदानं निर्वर्तितं। कथमविहितः प्रदानार्थः स्वाहाकारः प्रदानार्थं निर्वर्तयिष्यति। विहितत्वात् कृतार्थः स्वाहाका ज्ञ
रेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयत इति। ननु उभयोः स्वाहाकारवषट्कारयोः प्रकृतावाम्नानादनारभ्यवादस्थानपठितत्वात् उभय राम
तः प्रदानार्थता मन्त्रयोर्विधास्यति। तस्मात् सामप्रकृतयोर्विकल्पः॥ ॥ तत्र चोदनावेष्टेः प्रवृत्तित्वात् द्विधिः स्यात्॥ वाजपेये पश्वा २२
रण्यिये। तत्र चोदना वा तद्वत्प्रनेनेन दर्विहोमाः प्रतिदिश्यते। उक्तेति चोदनायै दर्शपूर्णमासयोरंगानां विशेषाद् दर्विहोमेषु प्रवर्तेर

त्वाके पुनस्ते नारिष्टहोमाः कस्मात्कारणमंतरा॥ ते हि प्रकृतधर्म्माणः सर्वेष्टिषु सर्वपशुबंधेषु प्रवर्त्तमाना दृष्टाः पशुबंधे धर्मः प्राये
णदृष्टः सतस्या दृश्यमानोप्यनुमीयते। यथायः परार्थस्त्रायेण करोति तस्मिन्नस्मिन्नपि परार्थं कुर्वस्ते सः एवं संभाव्यते। तस्मात्तेषां प्रवृत्तिः
॥ ॥ शब्दसामर्थ्याच्च॥ शब्दसामर्थ्यं च चोदनासामान्यं दर्विहोमानां नारिष्टहोमेपि हि जुहोतिचोदना नारिष्टाञ्जुहोतीति भिन्ने तु हो
तीति। चोदनासामान्यात् धर्म्मप्राप्तिः॥ ॥लिंगदर्शनाच्च॥ लिंगं चैतमर्थं दर्शयति यथा नारिष्टहोमः पूर्वं त्वं दर्विहोमानामिति। किंचि
दंभवति। अग्निहोत्रे श्रूयते। यदि दर्वीं ईटेवपधेतां तः परिधिं निनयेदिति। तथा ह्येवं श्रूयते। अंतर्वेदि तिष्ठन्सावित्राणि जुहोतीति। परिध
यश्चेदिष्टौ प्रधानार्थत्वान्नारिष्टहोमानां। यदि तेषां धर्म्माः प्रवर्त्तेरंस्तत एतद्दर्शनमुपपद्यते। तस्मात्तेषां प्रवृत्तिः॥ तत्राभावस्य हेतु
त्वात्तमुल्लार्थस्यादर्शनं। यदेतत्कुल्लार्थेन नारिष्टहोमार्थे दर्शनमुपदिष्टं। नारिष्टहोमानां प्रकृतानावित अर्थः अदर्शनं तदसायत्कमित्य
र्थः। कुतः तत्राभावस्य हेतुत्वात्। अवकेषु अप्रतिषिद्धिता वैश्वंवका उल्का॥ नेध्माबर्हिः संनह्यते न प्रयाजा इज्यंते नानुयाजा इज्यंते॥
न सामिधेनीरन्वाह इति अप्रतिषिद्धितालं वकानां प्रतिज्ञाप्य तदुपपादनार्थं सामिधेन्यादीनामभावो हेतुत्वेनोपदिश्यते। यदि च नारिष्टहो
माः प्रवर्त्तेरन्ततस्तेषां प्रधानार्थत्वादिध्माबर्हिषोः सामिधेनीनां च अवकेषु भाव एव स्यात्॥ तत्रायं तदभावो सत्वः हेतुत्वेन नयुज्यते।

तस्मान्नारिष्टहोमानाम प्रवृत्तिः ।। ।। विधिरिति चेत्। इति चेत् लक्षणसिद्धर्शनमेतदित्यथ कस्माद्विधिर्न भवति नारिष्टहोम
प्रवृत्तित्वात्प्रधानानामिष्ट्यादीनां प्रतिषेधको विधिः सन्नपूर्वमर्थं विधास्यति। अनुवादोऽप्रवृत्तेर्विदितोषकरो नर्थकः स्यात्स्थिता
योप्रतिज्ञायां सत्रेण परिचोदयति ।। न वाक्यशेषत्वात् गुणार्थेन समाधानेनानात्वेनोपपद्यते। नायं विधिर्युज्यते। किं कारण
मन्त्रोऽत्र विधिराम्नातः ।। आदित्यं घृते चरुं निर्वपेत् पुनरेतस्य गृहे स्थितिः। तस्य वाक्यशेषोयं। कथं ज्ञायते। तेनाकृंछिलिताते ।। नै
नौ अप्रतिष्ठिता वैश्यं वका इति दोषमन्त्रकीर्तिरिदं श्रूयते। आदित्यं घृते चरुं निर्वपेत् पुनरेतस्य गृहे स्थितिः। इयं वा अदितिरियं प्रतिष्ठाप
दादित्यस्यामेव प्रतीतीति। तदेतत्तस्य दोषस्य परिहारार्थमिति विज्ञायते। अतस्तेन न सहैकवाक्यतां यान्ति। तन्मध्ये वयं पदस्याध्यमा
ववचनात्संपितत्ते धापवृत्तसमुच्चारणम्नायासेय दिविषयाकल्पे रक्तु दृष्ट्वा कर्मा निन्नवेयुः तत्रैपो वाक्यरूपं वाध्येत। अपविहि
तकल्पनानुसारात्। न चैषां विधायकत्वं अनुवादस्वरूपत्वात्। तस्मान्नविषयः। अथ कोऽत्र विशेष दोषः। यत्समाने लिंगत्वे श्रुत,
परिधिरिदर्शनमसाधकमित्यरत्नाधकमिति। विशेषस्तु परिष्टाद्वक्ष्यामः ।। ।। येषां चापरयोर्होमस्तेषां स्यादविरोधात् ।। येषां वाय
ज्ञानामपरयो रस्यो होमः तेषां प्रवृत्तिः स्यात् पत्नीसंयाज्ञानामित्यर्थः। कुतः। विरोधात्। तत्र विरोधो नास्ति येनारिष्टहोमानां।

गाम २८

का: ४

प्रवृत्तौ उन्नयनत्वाभावस्य हेतुत्वात् इति तेषां हीज्या बर्हिः सामिधेन्यश्चैनेवांगं तदभावदर्शनं न तत्र न विरुध्यते । प्रवृत्तिधर्म्मा
णां लेपिन्ने होतिवेदनाश्वसरूपत्वात्तु होतीति तस्मात्तेषां प्रवृत्तिः ॥ तत्रौषधानि वोधेतत्ता निरुप्यानेन गम्येरन् ॥ नैतत्पुक्तं किं कारणं
यतस्तत्रौषधानि वोधेते दर्विहोमे यथा त्र्यंबके पुरोडाशाः करंभपात्राणि तंडुला इत्येवमादीनि तानि स्थानेन गम्येरन् ॥ आज्य
स्थानापन्ना आज्यधर्म्माः प्राप्येरन् ॥ तैनेत्याज्यस्ताचानुष्ठातुं अनुष्ठीयमानावाज्यप्रकृतिकार्याः स्युः । तत्र चोदकोवाध्येत । तस्मान्नैते
षां प्रवृत्तौ किं विप्रयोजनमस्ति । याज्यानुवाक्ये अपि मंत्रान्तरेण निवर्त्त्येते । वषट्कारः स्वाहाकारेण ॥ लिंगाद्वा त्रौषधहोमयोः पिष्टलेप
फलीकरणहोमयोर्वा प्रवृत्तिः स्यात् कुतः लिंगादेषधसामान्यात् । यच्चपत्नीसंयाजाज्ञानां प्रवृत्तौ दोषउक्तो धर्म्माणामानर्थक्यं तद
त्रनास्ति तत्रौषधधर्म्मा निर्वपणादयः शक्याः कर्तुं तस्मात्तयोः प्रवृत्तिरिति ॥ ॥ अप्रतिपत्तौ तु ते भवतास्तस्मादतदधिकारत्वं ॥ नवेत
देवं कुतः । यतः प्रतिपत्तिकर्मणी एतौ होमौ दर्विहोमास्तु प्रधानकर्म्माणि तेषां दूरतो भेदः सामान्यतस्तु धर्म्मप्राप्तिरिष्यते । यज्ञोते
औषधधर्म्माः शक्याः तत्र कर्तुमिति । प्रतिपत्तित्वादप्रयोजकौ एवं निर्वपणादीनां धर्म्माणां अतत्प्रकृतित्वं तेनैव न्यायेन नोपपन्नं
नापि प्रयोजनवत्तस्मादेतद्यपपुक्तं । एवं न कुतश्चिदपि दर्विहोमानां धर्म्मप्राप्तिर्युज्यते । तस्मात्पूर्वः संनिपाते विरोधिनामप्र

५५१

२५ वृत्तिः प्रतीयेत विप्रतिषिद्धव्यवस्थानादर्थस्यापरिगण्यत्वात् वचनादिति चेत्। स्यात्। अथ कस्मादुदुम्बरपर्णसाधनानामपि लिं
गानां भवेत्। अप्रवृत्तिरेव प्रतीयते। न पुनः प्रवृत्तिरित्युच्यते। सन्निपाते विरोधिनामेतेषां लिंगानां प्रवृत्तिः प्रयोक्तुं न न्याय्या॥ कुतः॥
विप्रतिपत्तिव्यवस्थानात् विधीनामुत्पत्तिः। पाठः सर्वत्र व्यवस्थितः। केचिद्दर्शपूर्णमासयोः पठ्यंते। केचित्सोमे। तेषामर्थस्यापरिगण्यत्वं
यत्र पठिताः ततोऽन्यत्र परिभिद्यमाने श्रुतप्रकरणं बाध्यते। तस्मादप्रवृत्तिः प्रतीयेत। तत्राह किमेष एवोत्सर्गः सर्वत्राप्राप्तिरि
त्येवं खलु प्राप्त उच्यते। वचनादिति चेत् स्यात्। यथा राष्ट्रभृतामुपहरकर्मसु। असत्यपि विधिवचने। पूर्वा इति। अथ ये लिंगा
अपदिष्टे यदि क्रीडेत पचेत अंतःपरिधि निनयेत्। अंतर्वेदि निष्ठ्यूतादि चाण्यनुरुणीति। तयोः कः समाधिः उच्यते। अन्याय
सर्वतां श्रुत्वाण्याचादः संविज्ञायते। अंतःपरिधिदेशोऽन्तर्वेदिदेश इति परिधीनां वेदेश्चात्राभावात्। यथा रजनीमकंडू यदि
तिलकोऽमेस्पंदन इति रागाभावे तिलकाभावे वत्तद्वयालक्षण्या भवंति वचनात् इति॥ ॥छ॥ ॥ इति श्रीमच्छाबरस्वामि राम
विरचिते मीमांसाभाष्ये अष्टमस्याध्यायस्य चतुर्थः पादः समाप्तः॥ ॥छ॥ ॥ ॥ ॥छ॥छ॥ ॥ ॥ २५